19X
172
SARASWAT LIBR...
BENARES CITY

॥ श्रीशारदाम्बा विजयते तराम् ॥

# ॥ विमर्शः ॥

नाम

## मायातन्त्र-प्रारब्ध-पुरुषार्थ-पुनर्जन्मपुरोगमानेकार्थयाथार्थ्यप्रख्यापनपरः

श्रीमत्परमहंसपरिव्राजकाचार्यवर्यजगद्गुरु-
श्रीमच्छङ्कराचार्यश्रीशारदापीठ-
द्वारकासंस्थानाधीश्वर-
श्रीमद्राजराजेश्वरशङ्कराश्रमस्वामिमहाराजानां
कृतिरेषा जागर्ति तराम् ।

वाराणस्यां राजराजेश्वरीयन्त्रालये मुद्रापितम्

इदं पुस्तकं १८६७ सप्तषष्ट्युत्तराष्टादशशततमस्य २५ पञ्चविंशतितमराजनियमानुसारेण पुनर्मुद्रणाधिकारे ग्रन्थकृता स्वायत्तीकृतमस्ति ।

विक्रमशकाब्दाः १९९५

# भूमिका ।

अथास्य भारतवर्षस्य दक्षिणापथ आन्ध्रदेशपराऽलङ्कारभूतायाः श्रीमत्या गोदावर्याः पुण्यभूम्यामस्ति कश्चिद्राजराजनरेन्द्रपुरीमण्डले [ Godavary District ] 'पुलुगुर्त्तमाचवरं' नामा महाग्रहारः। तस्मिन्नान्ध्रभूदेवानां 'वेलनाटि' श्रेणीमये द्वात्रिंशत्सङ्ख्याकपूर्वपुरुषपरम्परया किल वेदवेदाङ्गाद्यशेषविद्यापारावारपारीणया पुनरग्निष्टोमपौण्डरीकवाजपेयबृहस्पतिसवादिसमस्तसोमसंस्थासम्पद्दरया प्रतीततरो विद्योतते कश्चन श्रोत्रियवन्द्यो वंशविशेषो मीमांसावार्त्तिकप्रभा-पाणिनिसुधाऽद्वैतसिद्धाञ्जन-बौद्धाधिकारमण्डन-न्यायनक्षत्रमालाऽऽदिमहानिबन्धकर्तृकस्तस्यामेव श्रेण्याम् । वंशे तस्मिन् 'न्वेमूरिवारु' इत्युपाभिधाने यथोपवर्णितगुणगणमण्डितश्रीमन्माधवाध्वरिनागेशरामाध्वर्याद्यात्मपितृपितामहादय इव तदादिविद्याविशेषभूषितास्तैत्तिरीयशाखिनस्समनुष्ठितज्योतिष्टोमाद्यनेकयागा अराजन्ताथ श्रीमन्तो रामाध्वरि [ रामसोमयाजुलुगारु ] समाह्वयाः सर्वज्ञो महायशसः । निजवंशसमानमाहात्म्यवतामत्रभवन्महामहोपाध्यायश्री 'चिंवुकुलकृष्णशास्त्रिणां' तनूभवा 'सीताम्बा' सुनाम्नी तेषामजनिष्ट धर्मपत्नी श्रीमत्सीतासोमपीथिनी हि महाभागा । आभ्यां नाम श्रीमद्रामाध्वरिसीतासोमपीथिनीपयःपयोधिभ्यां श्रीमन्माधवशास्त्र्यादिकुमारेन्दव उदिताः पञ्च वेदवेदाङ्गादिविद्याविलाससदनाः श्रौतस्मार्त्तधर्मानुष्ठाने च परे ब्रह्मतत्त्वे निष्ठागरिष्ठाः ।

तेषां मध्ये तृतीयपुत्रः श्रीमज्जगन्नाथशास्त्रिमहाशयः

95-902300

श्रीमत्पितृचरणसकाशादधिगतवेदवेदाङ्गादिविद्याविशेषविभवः प-
रवैराग्यसमाश्रयश्च स्वब्रह्मचर्याश्रम एवैकविंशतिसमासम्मिते व-
यसि निजाग्रयातीर्थयात्रागृहीततद्धृदयः काञ्चीरामेश्वरावन्तिकाप-
त्तनवट्यादितीर्थजातमासेवमानस्तत्र चान्यत्र राजधानीष्वनेका-
ध्यापनप्रचारणादिभिः शास्त्राणामवाप्तकीर्तिः श्रीमतीं ननु पुरीं
द्वारवतीमाससाद सोत्साहम् । तत्र हि श्रीमद्द्वारकेशशार-
दापीठाधीशयोर्भगवज्जगद्गुरुपादाम्बुजयोः सन्दर्शनादिसुक्रिया-
सक्तप्रवृत्तिसमय एवादरानुरागभरैस्तैस्तैर्देशिकेन्द्राणां सत्कृत
आसीन्निजपदसमारोहणैकहेतवे सोल्लासम् । तत ऊर्ध्वमसौ
पण्डिताग्रणीर्निजवंशपरम्परातो विश्वगुरुमहेश्वरापरावतारश्रीमद्भ-
गवत्पूज्यपादपादाम्बुजातमकरन्दरोलम्बायमानतया परानुशासनन्ते-
षामुत्तमाङ्गेनादृत्य तन्निर्याणसमये समुपस्थिते ब्रह्मचर्यादेव च-
तुर्थाश्रमं परिगृहीतपारिव्राज्यश्च यथानियमं श्रीमद्देशिकेन्द्रपदा-
धिरोहणमाचकार पुरीगताशेषप्रतिष्ठितसज्जनानामभ्यर्थनाभिः
पुनर्यथायोगम् । महोत्साहस्य किञ्चास्य व्यतीयुरेवाब्दाः प्रा-
यशो विंशतिः । तदारभ्यैते "श्रीमद्राजराजेश्वरशङ्कराश्रम-
स्वामिन,, इति योगपट्टसमलङ्कृता वरिष्ठद्वारकाशारदापीठज-
गद्गुरुपदाधिकारमासाद्य देशाधीशवटपत्तन ( बड़ोदा ) राजधा-
नीसाम्राज्यधुरन्धरश्रीमद्गायकवाडमहाराजैः श्रीशारदापीठपरा-
भ्युदयवर्द्धनैकबद्धश्रद्धैरितरैश्च सौराष्ट्रादिमण्डलेश्वरैर्भगवत्पूर्वा-
चार्यमाहात्म्यानुरूपमतितरां सत्क्रियमाणाः पुरीं परमलङ्कुर्वा-
णाश्च परमाचार्यकर्तव्यतां स्वां संस्मरन्तः शिष्यस्तोमसमनुग्र-
हाय निजधाम्नो द्वारवत्या देशविशेषान्सौराष्ट्रादीन्प्रस्थितवन्तो
यथान्यायम् ।



तदाप्रभृति जामनगर-भावनगर-राजनगर ( अहमदा-
बाद ) वटपत्तनोदयपुरेन्दूरोज्जयिनी-भोपाल-ग्वालियरागरा-मधुपु-
री-इन्द्रप्रस्थ ( देहली ) लाहोर-जम्बू [ काश्मीर ] माया-
पुरी [ हरद्वार ] बरेली-लक्ष्मणपुर्ययोध्यापुरी-पाटलीपुत्र-नव-
द्वीपकृष्णनगरी-प्रमुखराजधानीनां श्रीमन्नरेन्द्रैः सदसद्विचारचा-
तुरीसमलङ्कृतप्रचारैः सामन्तसम्भावितविद्वद्वृन्दैश्च स्वकी-
यविद्वत्तातपआदिभ्यामभिपूज्यमाना ब्रह्मक्षत्रादिभिः सर्वैरेव वि-
शिष्य सेव्यमानाश्चोदग्मण्डले भारतवर्षस्याशावधि विजययात्रा-
यां विराजन्ते । कुमतप्रवृत्तीरनेका यथावत्तत्र तत्रात्युच्चैर्वि-
नाशयामासुः वैदिकतन्त्राणि च यथामर्यादं प्रचारयामासुः ग्र-
न्थान्पुनः सप्त अद्वैतसाम्राज्य-पर्य्यटनमीमांसा-त्रिदण्डिमतविभे-
दिनी-पुरुषार्थसञ्जीविनी-ज्योतिश्चक्र-पुरोगमानेतत्सहभाविनः स-
प्तविंशतिसहस्रश्लोकपरिमितानिदानीं दशवर्षाभ्यन्तरे यथावका-
शं रचयाम्बभूवुर्गम्भीरार्थानथ प्रकृतोपयोगान् ।

अत्र हि पुंमात्रमितिकर्तव्यतापराधारभूतकालावयवैः कृ-
तत्रेताद्युच्चावचयोग्यतापरीतात्मभावैरुपगीयमानन्यूनाधिकयोग्य-
तावत्तायां नाम गुणोत्कर्षापकर्षसन्निरूपितायां सञ्जाताः कि-
ल लाभा हानयश्च प्रज्ञाज्ञानादिजनसमवेता भवन्ति निर्दिष्टाः ।
कलावस्मिन्बौद्धाद्यशेषदुर्वादिनां हन्त द्वात्रिंशदुत्तरैकसहस्र-
१०३२ सङ्ख्यानामसद्ग्राहपटल्याः पुनः प्रभूतमायायाः समूलो-
न्मूलनायावतीर्णानां भूम्यां तावच्छ्रीमद्भगवत्पूज्यपादानां य-
थावस्थितावतारवेला परं निरटङ्कि । वरिष्ठद्वारकाशारदापीठज-
गद्गुरुपरम्परा चावेदिता । भगवतां ननु दिग्विजयप्रसङ्गस-
मुत्पन्नानेकदुरालापानामथ जान्त-ध्वान्त-भ्रान्तादीनां दुर्नीतयो

मायावादविषया व्युदस्ताः । स पुनर्वादः परमवैदिकतया संस्थापितः । त एव केवलमेहश्वरापरावतारतया दिग्विजयमहोविभ्राजितात्मानो नेतरे परमर्षयो वा तादृग्रूपा इतीदं वस्तु व्यक्तीकृतम् । सत्यानृतयोर्लक्षणस्वरूपे प्रदर्शिते । प्रारब्धपुरुषार्थयोर्लक्षणस्वरूपप्रामाण्यविवेचनपुरस्सरं पुरुषार्थमाहात्म्यमतितरामुपगीतम् । सिद्धान्तश्चानयोरुद्ग्राहितः । बहुतरोपपत्तिप्रमाणपर्यावेदनपूर्वकं जन्मान्तरमनभ्युपगच्छतां तावद्वादिनां मतमपाकृतं प्रतिष्ठापितञ्चैतदतिमान्यप्रमाणगणैरत्युच्चैः । अर्थानामेतेषामन्तराले प्रसङ्गागता विषया अनेके निर्ग्राहिताः । सर्वे चामी सम्प्रतिपन्नमतिप्रचाराणां पुनर्विप्रतिपन्नानां सन्देहनिरासपूर्वकं निश्चितमतिमेषामीप्सितविषयां वितनुयुः । तेन ते निर्व्यप्रमितिकर्त्तव्यतास्वात्मनो वर्त्तेरन्नभिलषितेन पुनः पुरुषार्थापरपर्यायेणात्मनश्चरितार्थीकुर्युः प्रत्यर्थम् । तथा चात्रभवद्देशिकवरपरिश्रममत्र परामृशतां यथोत्साहं वर्त्तिष्यमाणानां च मनीषिणां चेतःप्रसादमभ्यर्थयेऽहम् ।

विष्णुशास्त्री ।

श्री ११०८ मच्छङ्करभगवत्पूज्यपादा
जगद्गुरवो विजयन्ते तराम् ।

—०×+*+×०—

# ॥ विमर्शः ॥



आश्चर्यवद्यमवतामपि सम्प्रयोगा-
दुद्वर्तते निजमनन्तचलञ्जगच्च ॥
तत्वाय तस्य परमाय भवाय भूत्यै
चेतोऽर्पितं वहतु वृद्धविधानसिद्धिम् ॥ १ ॥
तत्तेजोऽद्धा द्विविधमचरत्
आचार्येन्द्रेष्ववनिविभुषु ॥
भावे तांस्तान्विहृतमणनैः
प्रस्थानान्तेष्वचलचरितान् ॥ २ ॥

अनुशासनसम्पत्त्या
पथा वेधालिमौलिमाधत्ते ॥
यस्य सुपेशलशैल्या
पालयास्ते धीविलाससुमहिम्ना ॥ ३ ॥
तेषां मध्ये पौरुष-
मुख्यानर्थान्विविच्य बहुमानैः ॥
वक्ष्यामहे विविष्ट्यै
श्रेयोत्राञ्छी निगूढमनुविन्देत् ॥ ४ ॥

इह हि पुंसामर्थव्यक्तिप्रसूत्युपपत्तये कालो नूनं निदा-

१ व्यवहारसामान्यहेतुभूतकालात्मनः स्वरूपनिरूपणम् ।

नभावमुपाददानो विरूपप्रकाराक्रान्तसाधनसमवायसमावेशासमशीलः खेलनविपुलीभावमाभजते प्रतिप्रत्ययम् । निरवशेषास्तावत्सुरासुरनरनारीतिर्यगादयो व्यक्त्या विशिष्यानया परिच्छिद्यमानस्वक्रियाकलापपर्यन्ता अवधार्यन्ते यथास्वमेते त्रिपुटीविभेदसनिर्मासाः । कृते नूनमेतेषां कृतत्रेताद्वापरकल्यात्मानो निजावयवपरिरञ्जिताः समुल्लसन्त्याविर्भावतिरोभावभूमयः । तत्तस्य हि शोभनसूनू युगस्य द्वावेवाऽऽचार्याचलाजानिनामानौ सवितुः सत्तामूर्जितकलामुद्वहन्तौ सम्भृतीयेते प्रमाणजातात् । तौ चावश्यं प्रजानां व्यवहारधर्मयोरुन्नेतारौ विज्ञायेते । यथाहु "राजर्षयश्चैव राजा च द्वावप्येतौ धृतव्रतौ । न तयोरन्तरं किञ्चित्प्रजा धर्मेण पालयेत् । तानाचार्योपदेशो दण्डश्च पालयते तस्माद्राजाचार्यावनिन्द्यावनिन्द्याविति" स्मृतिकारा गौतमादयः । एवञ्च यदा यदा ह्यमुयोर्ग्लानिः प्रसृमरा स्यात्तदा तदाऽधर्मोत्थानधारां चाऽऽस्य स्वस्त्ययनैककारणीभूतसभीकरणकर्मणे प्रय-



तितव्यमुभाभ्यामित्युक्तं भवति ।

अत एवैतान्तावत्सरणिमनुवर्तमानाः सर्व एवोदीरितनिय-

२ कालावयववाच्छेदेनापत्रापार्थोपवर्णनम् ।

न्तारः सर्वयुगीयाः समाख्यायन्ते कथाऽन्तेपरमितिहासादीनाम् । यदा पुनस्तयोरेव समीचारयोर्मन्दीभवनस्य वा विलोपस्य प्रसक्त्यतिशय उपसर्पेत्तद्वात्ववचनीयमाङ्गस्येतरसन्तानसमुपस्थितेराविर्भावोऽप्यभ्याशीभवेत्तथाविधमानुषाणाम् । सोऽयं प्रसङ्गातिशय आसांबभूव भूरिशः । स्वास्थ्यसमाधानहानिर्वाऽवर्तत बहुकृत्वो युगे युगे । दोषाः खलु विनाशहेतव "त्रिविधं [illegible]रकस्येदं द्वारं नाशनमात्मनः ॥ कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजे" दिति विष्ण्वादिस्मृतिपरिगणिता भवन्ति जिज्ञास्या यतस्तेभ्यो निर्मोचनोपायपरिग्रहपरायणाः सद्वर्त्मन्युपसीदेयुराञ्जस्येन शीलितशेमुषीकाः ।

दोषानमूनवसायाऽपि दुर्दैवपराहतचेतसां पुनः सन्मार्गप्र-

३ कामेन पुनः क्रोधेन वेणश्च कार्तवीर्यो हताविति निरूपणम् ।

चारलोपं चोद्भावितवतामुदाहरणशतेषु प्रत्यासन्नमुदाहरणं किल वेणस्य कृतयुगीयस्या "यं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः । मनुष्याणामपि प्रोक्तो वेणे राज्यं प्रशासति ॥ स महीमखिलां भुञ्जन्राजर्षिप्रवरः पुरा । वर्णानां सङ्करं चक्रे कामोपहतचेतन" इत्याद्युक्तिभिर्मनोर्महाराजस्याऽध्यवसीयमानं प्रतिपद्यामहे यथावत् । प्रसक्ता अप्यन्येतरे कामे बीजिनि दोषाणां पौलस्त्यनीलादयो वेण एव मुख्यतयोपात्तो वर्तते । क्रोधे किल कार्तवीर्यो जमदग्निसंहननकृत्प्रसिद्ध्यति तरां सत्स्वप्यनेकेषु तदानीं वा तद्दोषहतेषु पुनः पुमर्थप्रच्यावकेषु ।

४ लेभेन दुर्योधनादय इति च ।

लेभे हन्त दुर्योधनादयो यथोदितदूषणान्तरमलिनीभूतमानसाः सन्तो निषण्णाः परं लेभिरे विपदमन्यादृशीमिति व्यक्तमेव तावद्भारतादिभ्यः । युगचतुष्टय्या यथाक्रमं चतुष्पात्त्रिपाद्द्विपादेकपाद्धर्माचरणसन्नियतत्वे "प्राचुर्येण व्यपदेशा भवन्ती,, ति न्यायविशेषानुगृहीतत्वेऽपि भूषणानां दूषणगणसहभावितासमापत्तिलक्षणवैपरीत्यावेदनयोगिता नूनमभिप्रवर्तते निजलाञ्छनजाताद्व्यावर्तयितुं प्रेक्षावतो मानवधौरेयान् न तु जातु तावतैवात्मानं कृतार्थीकर्तुम् । वस्तुनः सर्वस्यापि साभिप्रायप्रयोगसमाक्षिप्तत्वात् ।

५ परीक्षिद्विक्रमादुक्तदोषानाक्रान्ताविति वर्णनम् ।

अथ एते दोषाः साधारण्येन सर्वानेव मानवान् व्याप्नुवन्तः शास्तॄनपि तद्वतां परिच्छिन्दन्तीति त एते समुदाहृता विशिष्यैवेह वेणादयः सम्राट्कुलशीर्षण्याः । पादैकधर्माकलिते किल कलौ विक्रमादित्यो वस्तुवृत्त्या वर्णितदूषणदूरीभूतो रराज च सम्पूर्णमहिम्नामुदाहरणाय सर्वशः । कलिं किल कृतमेव कृतवतः परीक्षितो महाराजस्य दूरीभूतदुरन्तदोषग्रामस्य च गुणविभूतिमूर्तिमतोऽन्यादृशमेवाऽवर्तत माहात्म्यम् । जनमेजयकृतोग्रतरसर्पयागसमनन्तरकालीनदैवकोपसमुद्भूतस्य हि बुद्धवपुर्धारिणो जनार्दनस्य नास्तिक्यागमसमावलम्बिधरामण्डलकुण्डलीकृतदशाविभेदपर्यवेक्षया कृत्स्नानामेव स्थानानां तावल्लौकिकालौकिकानामात्यन्तिकापहानितमस्तोमसमाच्छन्नता समासीन्ननु सार्धसहस्रसमासम्मितकालमत्युल्बणगरलमहीरुहफलपलाशादिगुणविभेदसहोदरी हन्त सर्वशः ।

तदवस्थापहन्त्र्याः सुधायाः प्रादुर्भूतौ भगवतो बालमृगा-



६ जनमेजयस्योत्तरकालं बौद्धाद्यसत्प्रवृत्तौ तदुन्मूलनाय श्रीमन्महेशांशावतारभूतभगवत्पादादिकृतसकलसन्मार्गसंस्थापनादिदर्शनम् ।

ङ्कशेखरस्यावतरणप्रक्रियाया मुकुन्दब्रह्मेन्द्रांशविशेषपुरस्कृतायाः श्रीमच्छङ्करभगवत्पूज्यपादपद्मपादसुरेश्वरहस्तामलकतोटकपादसुधन्वसम्राट्पुरोगमस्वरूपापरपर्यायाया लौकिकालौकिकप्रस्थानसामान्यसमुद्धरणसमुज्जृम्भिताया अलौकिकमेवाबभूव माहात्म्यं यद्बलादत्राद्यावधि सदर्थप्रघट्टिका उज्जृम्भन्ते । प्रवृत्ताः पुनरन्तराले शाक्यादिदुर्मतयो दुर्नीतयश्च कापङ्कषिताः सञ्जाता इति निबन्धमात्रसंसिद्धं पुनः सकलसुविचारकपरम्परापरिप्राप्तश्चैतत् ।

७ बुद्धमतविषयिणी शङ्का तन्निरासश्च ।

ननु महाभारतादिभ्यो बौद्धादिवर्त्मनः सम्प्रत्ययात्कथमस्य प्रवृत्तिर्जनमेजयसमयसमनन्तरमासीदिति । नायं दोषः । स्वाव्यवहितोत्तरकालीनाया एव बौद्धादिप्रक्रियायास्ततोऽपि विवक्षितत्वात् । यदि चेत्प्रागपि स्वकालादस्य प्रवृत्तिरभविष्यत्तदा तत्कालीनतयैतस्यापि निबन्धजातं स्वसम्प्रदायमतजनसहस्रैः समं किलोपापत्स्यत् । नोपपद्यते तथाभूतं किमपीत्युदितमेवाश्वासितव्यम् । ननु विष्णोर्भगवतः प्रतिपत्तव्ययावद्वस्तुनिदानभावमापन्नतया कथङ्कारमागमग्रामस्यास्य व्यासेधविषयता स्यात् कथं वा तदात्मा हि महेश्वरो व्यासेधेत्तमेतामिति । न खल्वप्यसौ दोषः । उपादेयवचननिष्ठगौरवभावाद्देवोपेयतां भजमाना आलक्ष्यन्तेऽथ संराध्यन्ते संराधकगणैर्देवाः पुनर्देवाधिदेवाः । तत्र चेत्यौन्यं वा प्रकृतार्थप्रहाणिर्वा पर्यालोच्येत तदा ते एव तन्निष्ठमसहमानैर्गौरवमात्मलाघवं प्रद्योतयतः । दृश्यन्ते हि सत्येव व्यव-

हार उपादेयवचना असत्येव तस्मिन्ततो विपर्ययप्रतीतिभाजो जगत्याम् ।

इयमियं हि सरणिरासुरासुरस्वभाववन्मानवेभ्य आ च

८ बुद्धस्य वाचने भगवतो विशिष्टसामर्थ्याऽऽवेदनम्।

मुकुन्दब्रह्मेन्द्रेभ्यः प्रचलन्त्युद्वीक्ष्यते सनातनीति । नैतां कश्चिद्विचारपराहतचेता वा शक्नोत्यन्यथयितुम् । एवं च प्रमाणभूतस्य हि विष्णोः प्रमाणगणैर्मन्यमानत्वेऽपि तेभ्यो विगीताचारप्रवर्तयितुस्तस्य ताद्रूप्येणानाप्ततां संयातस्य तिरस्कारक्रियाविशेषपात्रताया अनन्याय्यत्वात् । "तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतमि" त्यादिश्वेताश्वतरादिश्रुतिभ्यः " परहंसात्मना सत्यः परमात्मा महेश्वरः ॥ करिष्यत्यवतारं हि जम्बुद्वीपे कलौ युगे । दुष्टानां निग्रहार्थाय शिष्टानां रक्षणाय च । वेदराद्धान्तसंस्थित्यै सत्यरूपेण भारत ॥ चतुर्भिः सहशिष्यैस्तु शङ्करोऽवतरिष्यति ॥ शङ्करः सवितानन,, इत्यादि मार्कण्डेयपाद्मवाय्वादिपुराणवचनेभ्यश्च महेश्वरापरावतारभूतानां तावद्भगवत्पूज्यपादानां निरतिशयशास्तृत्वेनासदर्थप्रवर्तयितुर्बुद्धवपुर्धारिणो विष्णोरपि विश्वोद्धरणाय शासितृत्वस्य न्याय्यतरत्वात् । उपादातव्ययावत्कार्यहेतुभावभाविता तु विष्णौ वेदोदितसदर्थव्यवस्थासम्पादनैकदशायामेवोपपद्यते न तु जातु तद्विनाशविशेषबद्धपरिकरतावेलायाम् ।

ननु विनिगमनायां बुद्धदेवरूपिण एव किं न स्यात्प्रामाण्यं

९ तदर्थं प्रमाणप्रदर्शनम् ।

विष्णोः तन्निरूपितागमाचाराणाञ्च । मैवम् । "निःश्वासभूता मे विष्णोर्वेदा जाताः सुविस्तराः । तिलेषु तैलवद्वेदे वेदान्तः सुप्रतिष्ठित,, इत्यृचा च



मुक्तिकोपनिषदीव्यमानया वेदानां पुनस्तदुदितकर्मोपासनाज्ञानलक्षणप्रस्थानानामेव त्रयाणां वैष्णवत्वे तेषामेव मनुवसिष्ठपराशरपाराशर्यादिमहाजनपरम्परापरिप्राप्तत्वे च तद्ग्रन्थानांपूतबुद्धतदागमाचाराणामर्वाचीनानां चतुर्विंशत्यंशावतारसमाचारसामान्यबहिर्भूतानां तिरस्कार्यतमैकवर्गीयत्वस्य स्वीकार्यकथासंसर्गानवकाशात् ।

नन्वेवं तर्हि "शृणु देवि प्रवक्ष्यामि तामसानि यथा-

१० भगवतामपि सिद्धान्तशरणीकरणं दुष्टशङ्काया उपमर्दनं श्रुत्युपपत्तिभ्यां मायावादप्रतिष्ठापनं च ।

क्रमम् । येषां श्रवणमात्रेण पातित्यं ज्ञानिनामपी" त्यारभ्य "मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते । मयैव कथितं देवि कलौ ब्राह्मणरूपिणे" त्यन्तेन पाद्मवचोनिचयेन भगवत्पादमतेऽपि दूषणसमृद्धिरेव । मैवम् । दूषणगन्धस्यापि वस्तुतस्तत्रानारोहात् । न ह्येता वाचो भगवत्पूज्यपादानभिदधते । उदाहृततदवतारसंवेदकवाक्यनिकरैरेतासां परिहरणीयत्वात् । न हीह भगवच्चरणैः प्रतिष्ठापितं तत्त्वमच्युतकपिलकमलासनपाकशासनमनुवसिष्ठव्यासादियावन्महाभागसमाराध्यं पुनरशेषवेदवेदाङ्गादिप्रमाणसौभाग्यातिशयसमलङ्कृतं वाङ्मात्रेण मोहनमात्सर्यादिदुर्दैवसञ्चारितेनालमन्यथयितुं फणाधराधीशादिभिरपि यतस्तैरुन्नीताः परभाष्यनिबन्धास्त्रिविष्टपसत्यलोकयोर्वा प्रचारणायाधिपतिभिस्तयोर्भक्त्युद्रेकात्सन्नीता इत्यत्र भवत्पद्मपादसुधन्वादिप्रार्थितानुभावानां दिग्विजयमहोत्साहादिसन्दर्भभाषितैर्यथावदधिगम्यते । निरवशेषमेव धरित्रीतलमुन्मथिताशेषकुमार्गं ननु सन्मार्गसामान्यसमालम्बिशिष्टविशिष्टव्यक्तिसहस्रकृतस्वसमर्हणाक्रान्तमासीदस्ति चेतिव्यक्ततरमागोपालमाच-

विपालम् । सति चैवं "मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमु-
च्यत" इत्युक्तिरकिञ्चित्करैव यत एतान्यलीकान्येव विशे-
षणानि मायावादादीनि पर्यवस्यंति । मायावादन्तु दूषितं
तावद्वदन्वादी पृष्टो व्याचष्टां यत एषा माया विज्ञायते तमेतं
वेदमेवासन्तं जानीते आहो स्वित्तस्यास्तत्त्वं याथातथ्येन प्रं-
तिपादयितारमुत मायाभिख्यामेव न सहत इति । नाद्यः। मायां
खल्वाचक्षाणा "आजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां ज-
नयन्तीं स्वरूपाम् । मायान्तु प्रकृतिं विद्यान्मायिनन्तु महे-
श्वरम् । इन्द्रोमायाभिः पुरुरूप ईयते । दैवी ह्येषा गुणमयी
मम माया दुरत्यये„ त्यादिश्रुतयश्च स्मृतयः सम्प्रथन्ते । ता-
भ्यः प्रतीतिविषयतां भजमाना हि माया प्रोल्लसन्ती तदात्मा-
नं नाम वेदं वेद्यसहस्रसञ्ज्ञानविज्ञानप्रदायिनं यथेच्छं विद्वि-
षन्नुन्मत्तवचनतरङ्गच्छेद्यरसनासमूलनालतां निर्विशङ्कमर्हत्येवासौ
शास्तॄणां पुरोभागे यतः । एवं च मायावादमश्रद्दधानः श्रद्धां
श्रुतिषु न सन्दधातीति वैदिकेऽर्थे वेदबाह्यस्याशङ्का पुरुषा-
पसदस्याकिञ्चित्करोपपद्यते । न द्वितीयः । यथाभूतां तथा-
भूततयैव मायां प्रतिपादयन्तो भगवन्तो यथायथं सुधामधुरिमे-
वोपादेयार्थरसास्वादपरमदैवत्याः सर्वान्तर्यामीव हृदयारविन्दा-
न्लापयान्ति पलमात्रं वा कृतसुकृतानां च सुधीन्द्राणाम् । नापि
तृतीयः । स्वेष्वपि पुस्तकेषु परैर्वा तस्या निजेष्टदेवतात्वेनोपा-
दानात् । न च "देवात्मशक्तिं स्वगुणैर्निगूढां । पराऽस्य शक्तिर्वि-
विधैव श्रूयत„ इति च श्रुतिभ्यां श्वेताश्वतराणां माया चासौ
भगवच्छक्तिरेवास्माकमभिमतेति भ्रमितव्यं वा भ्रामयितव्यम् ।
शक्तिं भगवतः सम्यगभ्युपगच्छताऽभ्युपगततरैव माया सा



स्वस्वरूपेण बहिर्मुखेनाऽपि यतः । दर्शितादर्शितश्रुतिशतान्मा-
याया एवैककण्ठ्येनावगमे तस्याः पुनर्भगवच्छक्त्यात्मता विव-
रणमात्रय नावकल्पते यतोऽत्रैवं ब्रुवाणस्य विष्णुशक्तावेवाभि-
मतायां नाभिमते स्यातां ते शक्ती च शिवविरिञ्च्योः । शक्त-
यस्तु तास्तिस्रः "शक्तयो यस्य देवस्य ब्रह्मविष्णुशिवात्मि-
काः । ब्रह्मविष्णुशिवा ब्रह्मन्प्रधाना ब्रह्मशक्तयः । सर्वभूतेषु
सर्वात्मन्याशक्तिरपराभवा । गुणाश्रया नमस्तस्यै शाश्वतायै प-
रेश्वर । याऽतीताऽगोचरा वाचां मनसाञ्चाविशेषणा । ज्ञानध्या-
नपरिच्छेद्या तां वन्दे देवतां परा" मित्यादिस्मृतिसमूहपरिकीर्ति-
ताः पुनर्व्यापकरूपेण मायापदाभिधेयतां तावत्पर्याददाना निर्धा-
र्यन्ते ।

यत्तु "छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं य-
च्च वेदा वदन्ति । यस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो
मायया सन्निरुद्ध" इति श्रुतिं श्वेताश्वतराणां व्याख्यातुकामेन
स्वषटकमायीपदं सर्वभवनसामर्थ्यरूपमायाख्यस्वाभिन्नशक्तिशा-
ली परमात्मेति विवृतं प्रतीयते प्राभञ्जनमारुतशक्तिकृता तत्त्व-
नुपपन्नमेव । मूर्तामूर्तयोरव्याकृतयोर्नामरूपयोरात्मैकशब्दवा-
च्ययोरात्मस्थयोरेव जगदुपादानभूतत्वात् । यथा चाम्नाय-
ते "नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म । नामरूपे व्याक-
रवाणि । सच्चत्यच्चाभवदि„ त्यादि । शक्तिपक्षेऽपि तस्याः प-
रमात्मनो भेदोवाऽभेदः । भेदश्चेत्कोन्वत्र भेदकः । अभेदश्चे-
त्कुत एतां प्रार्थक्येन ब्रूयाः । शक्तिं भगवति वदता किमव-
च्छेदेन तां लक्ष्यीकरोषि । एकदेशे चेद्देशान्तरावच्छेदेन तद-
स्फूर्त्या मानवीसामान्यैव सा स्यात् । सर्वदेशे चेद्व्यापिन्येवेति

व्याप्यस्वरूपभाषकपदविभेदबोध्यता तावत्तस्या न स्यात् । सेयं शक्तिस्तस्मिन्क्वाचित्की आहो पुनः सार्वत्रिकी । आद्ये अपचयप्रसक्तिः । द्वितीये उपचयव्यवहारानुदयप्रसङ्गः । त्वदभ्युपेतबालमूर्तीरिव तामपि ताद्रूप्येणैवाभ्युपैषि तदा कौमारयौवनवार्द्धक्यदशाविशेषोपहितमूर्तीरिव तामपि तदवस्थोपहितामुपेक्षमाणस्तस्या अपि वैय्यर्थ्यं किं न स्याः । न हि यां विमन्यसे तां तावद्वस्तुतया ग्रहीतुं वा ग्राहयितुं जातुचित्क्षमसे । तां चेमां शक्तिं "रामानुजानां सरणीरमातो गौरीपतेर्विष्णुमतानुगानाम् । निम्बार्कगानां सनकादितश्च माध्वानुगानां परमेष्ठिनश्चे„ति वैष्णवसम्प्रदायचतुष्टयं निर्धारयता कतमस्य सम्प्रदायस्य पुण्ड्रादिव्यवहारपरिणामपरां प्रतिपद्यसे । स्वीयस्यैव केवलमध्यवस्यासि तदा पुण्ड्रं परकीयमबिभ्राणस्तदाकारपरिणतां तामपि भक्त्या न बिभर्षीति, द्वेषविषयैव सा तव पर्यवस्येत् । सर्वस्यैव चेच्छ्रेयोवहं विजानासि तर्हि तद्धर्मावच्छिन्नौपयिकतया भाव्यमानस्यैव सर्वस्य युगपदयुगपद्वाऽधारयमाणो निश्चिन्वानश्चान्तर्मनस्यशेषमेतदपार्थं शक्तिं हन्तैतां तद्रूपाभिजननीं निश्चिनोषि खल्वत्युच्चैः । बहिष्ठं चैतत्पुण्ड्रमन्तरङ्गेयं शक्तिरप्रयोजयन्ती निरात्मकतामात्मनः स्वतो द्योतयन्ती "चेन्द्रोमायाभिः पुरुरूप ईयत" -इति मन्त्रवर्णसुपरिनिश्चितां पुनः सर्वतन्त्रसिद्धान्तसिद्धां मायां च स्वोपजीव्यामनुभवेशेदेवानुगताकारप्रकारफलपल्लवशालिनीं शश्वत्सर्वात्मिकाम् । न चात्यन्तमेव शक्तिमाययोरैकात्म्यमिति वेति साम्प्रतम् । व्यक्ताव्यक्तदशापन्नयोर्हेतुहेतुमद्भावमुपेतवतोस्तयोः साक्षादैवैकात्म्याप्रतिपत्तेः । इतरथा "देवात्मशक्तिस्वगुणैर्निगूढामि„ ति दशा हि कार्यत्वा-



वच्छिन्ना कारणत्वावच्छिन्ना च "मायान्तु प्रकृतिं विद्यादि" ति मन्त्रवर्णसङ्कीर्तिता व्यष्ट्या पुनः समष्ट्या न सम्पद्येयाताम् । मन्यसे शक्तिं मायां तु न मन्यसे अमन्यमानोऽपि विवरीतुं तामुत्सहसे यतोऽभिलापकमपरित्यजन्नभिलाप्यमेवात्मनोऽभीप्सितं प्रसाधयितुमीहसेऽतोऽत्र समीक्षकास्त्वां मायावादिनं मन्यन्ते तराम् । यद्यावेशवशाद्भगवदनन्यशक्तिमेव रमाऽपरनाम्नीं वा मायां प्रतिपद्यसे तर्हि भेदेन गृह्यमाणयोस्त्वयेन्दिरातद्रमणयो रमणक्रियायां कर्तृकर्मभावान्वितयोर्मध्येतैनैकात्म्यं स्वरूपसत्तयेति स्वाभ्युपगमहानिः । सा किल शक्तिस्त्वेष्टदेवता चात्मकपालभूस्थले धार्यमाणा श्रीरिति संज्ञावती त्याज्यैव तर्हि मायापदाभिधेयभूता साहङ्कारं दासंमन्येनाऽपि । त्यजन्नेतां स्यादेव श्रीसम्प्रदायत्यागी बत मायायामसौ दुर्मनाः । तान्तु श्रद्दधानस्य "दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति त" इति भगवद्वचनेन भूयस्येव हानिः स्याद्यतोऽत्रैतया स्मृत्याऽतिक्रमणक्रियागोचरा भवन्ती चावृत्त्यतिशयलक्षणोपासनासरणिसमुत्सारिता हन्त मायापदवेदनीया सा हि श्रीः पर्यवस्येत् । भगवत्प्राप्त्या तु तस्या निवृत्तौ निर्गतकनिष्ठलक्ष्मीसम्प्रदायोऽनिशं ज्येष्ठलक्ष्मीक एवोपतिष्ठेत् । परिशिष्टा अपि सम्प्रदायत्रयीनिष्ठा विनष्टाः स्युस्तस्या अपि ध्रुवमाराधकम्मन्याः ।

११ मायाया लक्षणं तत्स्वरूपविवेचनञ्च ।

वस्तुतस्तु नैसर्गिकब्रह्मात्मताविधार्मिदेहेन्द्रियादिदृश्यजातानर्थान्तरयावदनात्मप्रातिभासहेतुभूतः स्वप्रकाशचैतन्यानन्दनिर्विभागमहेश्वराश्रयत्वविषयत्वप्रत्ययभाग्गुणत्रयीमय्येव बन्धनहेतुर्व्यक्तिविशेषो हि

माया । इदं पुनरात्मावरकं तदधिष्ठानकत्वाज्ञानमभेयगोचरं भवति च भूमप्रमादाद्यात्मसन्तानसञ्चारचरम् । मायिनन्तु महेश्वरमित्युत्तरार्द्धस्यैव मन्त्रवर्णस्याल मानमूर्द्धन्यत्वात् । स्वाश्रयत्वविषयत्वलक्षणविलक्षणसम्बन्धावच्छिन्नाभ्युक्तमायात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतावत्वमुल्लसत्यत्र महेश्वरे । अखण्डार्थधीविशेषप्रत्यासत्युपरागोपहितत्वात्मकतादात्म्यसम्बन्धावच्छिन्नमहेशाभिधानप्रातिपदिकार्थत्वावच्छिन्नविशेष्यतानिरूपितप्रकारताशालिता तथैवास्ति हि मायायां यथोदीरितसम्बन्धावच्छिन्नायाम् । इतोऽप्यधिकतरप्रमाणाकाङ्क्षायां 'जीवेशावाभासेन करोति । माया चाविद्या च स्वयमेव भवत' इतीदमादिश्रौतं वचोऽवगन्तव्यम् । नैते पदे बहिर्मुखोपवर्णितान्यादृशभगवच्छक्त्याद्यर्थव्यक्तिसहे । निर्वर्णितविषयाऽर्थव्यक्तेस्तस्या निर्मानत्वान्निर्युक्तिकत्वाच्च । नहि "माली गच्छतीत्यादौ मालया गच्छतीत्यर्थो यथा न सम्पद्यते तथाऽत्राऽपि मायया सृजतीति न लभ्यत" इतीयमुक्तिः प्रामञ्जनमारुतशक्तेर्वास्तवी । उदाहरणस्यास्य वैषम्यात् । सर्जनगमनयोः सामानाधिकरण्यविरहित्वे "मायी सृजती" त्यृग्गतपदार्थसंयोजनहेतवे माली गच्छती"तिपदार्थयोजनमुदाहरणभावायालङ्कर्यं त्वित् । सामग्र्योरुभयोरितरेतरप्रातिकूल्यात् । न खलु माला गमने करणभावं प्रतिपद्यते । चरणपाटवस्यैव मनःसञ्चारशालिनस्तत्र सकलसत्त्वात् । सर्जने तु महेश्वरस्याव्याहतमेवास्ति करणत्वं मायायाः । अङ्कुरपलाशफलत्वावच्छिन्नं प्रति बीजस्येव चेतोभिरप्यचिन्त्यविन्यासोपलालितसृष्टिप्रतिसृष्ट्यादिसन्तानसमारम्भत्वावच्छिन्नं प्रति पटुतरघटनाविलासशालिन्या किल मायायाः पुनर्महाबीजस्थानीया-



या एव चैतन्यसान्निध्यप्रभाकरकृतचेष्टायास्तस्याः करणत्वस्याप्रत्यूहत्वे स्वस्सवाद्यर्थास्फूर्तिप्रयुक्तं नूनं मतिमान्द्यं वादिनोऽत्र मूर्तिमन्नृत्यति तराम् । न हि लोकदृष्टकारणकरणादिसामग्री लोकातीतमहेशसार्वज्ञप्रक्रियासामग्र्या समं साम्यमासादयितुमीष्टे यद्बलादत्र विप्रतिपन्ना वा स्वाभिमतं प्रसाधयेयुरंशतो वा ।

यत्तु पुराणवचनैर्मायायाः करणत्वमभ्युपेत्य "वन्हिर्दहति वन्हिर्दाहकशक्त्या दहतीति वाक्यवन्मायाकरणत्वबोधकपुराणस्य "तदात्मान" मित्यादिश्रुत्याविरोध इत्युक्तं तदुरुक्तम् । वर्णितरीत्या श्रुतिस्मृतिभ्य एवाद्धा तस्याः करणत्वसिद्धौ पुराणप्रमाणकतास्वीकाराभिनयस्य तदनु वन्हिर्दहतीति वाक्ये पप्तिसम्पादनानुकूलकृत्रिमचातुर्यप्रदर्शनस्य च देहावयवन्तु प्रमाणीकरोमि न तु तावद्देहमिति वदतो वचेरुपपत्तेश्च देहश्चेष्टते देहः स्वावयवसत्तया चेष्टत इत्येवमालिकायाः सहोदरायमाणत्वात् । नो खलु पुराणवचनानां प्रामाण्यस्य ज्ञाता तन्मूलीभूतश्रुतिस्मृत्योरज्ञातोपपद्यते अजानता वा गुरवः समाराध्यन्तां येभ्यो वचांसि तान्यपि सार्थमुपदेक्ष्यन्ते दर्शितविषया ।

१९ पुनरपि रूपान्तरेण मायायां बाह्युद्भावितशङ्कावतरणं तदपाकरणं च ।

यदपि "किञ्च जन्या त्वजन्या वा मायाऽऽद्ये जनको हि कः । अन्याभावात्तु अद्यैव सविशेषत्वमागतम् । द्वितीये त्वद्वैतभङ्गः कादाचित्के त्वसङ्गतम् । आत्मैवेदमग्र आसीदित्यादिश्रुतिबाधतः । अनादित्वे तु सान्तत्वमिति पक्षोऽप्यसङ्गतः । अनादित्वमनन्तत्वं मायाया इति निश्चया" दिति मार्तण्डोक्ततयाऽनूदितं तदप्यबोधोज्जृम्भितम् । "अजामेका" मित्यृचाऽनयाऽजन्यत्वादिधर्मिण्यां ननु मायायां

जन्यत्वादिगोचरविकल्पानवकाशाद्विकल्पसहसून्यकारपूर्वकसिद्धा-
न्तितार्थसुधास्वादसमुदितायास्तत्वस्यास्या ज्ञापयितव्यत्वाच्च ।
"तुष्यतु" न्यायेन विकल्पा एते अभ्युपेत्याप्यपाक्रियन्ते तथाहि मा-
यान भवति नाम जन्या । स्वकार्यात्मनो विश्वस्य प्रवाहात्मना त्रै-
कालिकत्वे कारणभूतायाः स्वस्याः कालापरिच्छेद्यता तदपेक्षया
यतो युक्तियुक्ता । नाप्यजन्या । जन्यत्वावच्छिन्नं प्रति जनक-
तायाः स्वस्याः सूपपादात् । जन्यत्वावच्छिन्नं प्रत्यन्यस्याहेतुत्वे
विकारविशेषास्पदं स्वस्या एव जननीत्वात् । स्वाम्प्रत्यपि जन-
कताचिन्तायाम्पुनरनवस्थापातः । स्वाभिप्रेतदिशाऽऽत्मानं ता-
म्प्रति जनकं जानाति तर्हि जन्यजनकभावेनैव वास्तवमन्येन
दृश्यकोट्यन्तर्वर्तिता तस्या अपि स्यात् । सेयं तर्हि स्वतः सि-
द्धोच्येत स्वतः सिद्धस्य ब्रह्मणः स्वरूपाप्रतिष्ठितिप्रसक्तिः ।
नापि द्वितीये त्वद्वैतभङ्गः । भङ्गत्वाक्रान्तदृश्यजातातीतेऽद्वैते-
नपायेऽपायिकात्स्न्यैकसाक्षिणि कूटस्थे भङ्गत्वाभङ्गत्वगोचरवि-
कारिशङ्कायाः सुतरामनारोहात् । न हि तादृग्रूपसम्पत्तावुदेति
कादाचित्कत्ववार्ताया अवसरः । ना"त्मैवेद"मित्यादिश्रु-
तेरस्ति बाधः । आत्मनः स्वरूपपरिस्फूर्तावस्वरूपमितताया एवा-
स्तित्वसामान्यसरणिसमुत्तीर्णाया बाधनसामग्रीसामान्यप्रयोगा-
विषयत्वात् । ज्ञानेऽनाहार्य्याप्रामाण्यादेरत्यन्तमप्रवृत्तेश्च । तस्या
अनादितां जानन्ननसादिताकथङ्कारमभिव्याहरेत् । तत्तत्का-
र्यतत्तद्देशतत्तत्पुरुषीयारम्भभेदम्प्रति तदाकारेणाकृतिमापन्नायाः
सादिताऽनुसन्धानधोरणीकत्वेऽपि समष्ट्या पुनर्ब्रह्माण्डमण्डलीस-
मारम्भसामान्यसमीक्षयाऽतीताऽनागतप्रचारसाक्षिण्या सादित्व-
शङ्कैव नोदीयाद्यतः । ननु स्यादेतदेवं तथापि मायोपादानतायां चेत-



नहेतुताहानिस्तस्यान्तु बौद्धं मच्छमार्थिकं विकचीभवत्येव ।
नैवम् । तत्वस्यास्य यथावदधिगमेऽनुपपत्तिकणस्याप्यस्फुरणात् ।
न ह्यसौ मायोपादानताप्रतिपत्तिश्चेतनहेतुतां क्वचिदपि निर्घ्ना-
ति अपि तु प्रमापयत्येव तां यथान्यायम् । चैतन्यसत्तासमुपमर्द-
नैपायिकश्चेदेव मायोपादानतालक्षणं कैस्तु बाधकप्रत्ययविशेषमा-
धातुमीष्टे । नचेहैवम् । प्रत्युत तमिस्रापादित्यस्फीतालोके स्वप्रका-
शलक्षणाऽऽलोकसन्निधाने नोन्मीलत्येव माया तदवधिप्रफुल्लाविला-
ससुमनोमालयत्यापि सहसैषा । किन्त्वसावस्तं याति समस्ताऽ
त्मापि सद्य एवातितराम् । यदि चेत्सहैवाऽऽत्मस्फूर्त्या स्फूर्तिं
स्वां वितनुयात्तदाऽभ्युक्ताशङ्काया अवसरः स्यात् । नैवमि-
ति सेयम् ।

१२ मास्तु मायेति मायान्तरशङ्काया- मशेषानुभवविषय- त्वेन तदपोहन- म्।

ननु स्वप्रकाशमहिम्नः सर्वाधिष्ठानतया समस्तकार्य्यैका-
रणतया च मास्तु हि मायाऽवान्तरभूता जातु
चिद्वा । नैवम् । स्वप्रकाशस्वरूपाऽनुसन्धा-
नकालेतरकालावच्छिन्नवस्तुभावचप्रपञ्चपर्य्या-
ऽलोचनयाऽवस्थाद्वयीप्रोल्लसदवस्थायास्तावद-
विद्याऽपरपर्य्यायायाः सकललोकसाक्षिण्याः प्रतिपत्तेरेवावान्तर-
कारणभूताया अपि मायायाः सम्प्रत्ययेऽसङ्कीर्णसाधकतमत्वात् ।
न हीयमेवं सम्प्रतीयमाना साहसमात्रेणापलापमर्हति मनाग्वा ।
ज्ञानाज्ञाने रूपरसादिवत्प्रत्यक्षे उपलक्ष्येतेऽन्तःकरणस्थे । न हि
रूपादेः प्रत्यक्षस्य व्यावहारिकसतो द्रष्टृधर्मता । अविद्या हि
स्वानुभवेनैव रूप्यते निरूपकैर्निर्विशङ्कं क्षिप्तश्चाहं मूढोऽस्म्यवि-
विक्तं मे चेत इति । तद्वदेव विद्या विज्ञानमनुभूयते । शास्तारः
शासति शिष्यान्प्रमादादपसृत्य धीरतया । शिष्याश्चावधार-

यन्त्यप्रमादमेव वेद्यार्थान्। नो खलु धर्माभ्यामेताभ्यामस्ति कश्चिद्बुद्धिजीवी परिमुक्तो जगत्याम्। अबुद्धिजीविनोऽपीष्टानिष्टे विजानन्तो यथायोगं बुद्धिजीविभिः प्रेर्य्यमाणाश्चेष्टन्ते तावदेताभ्याम्। कृमिपुरोगमा अप्येवम्भावाश्चेष्टया स्वया आलक्ष्यन्ते। उद्भिज्जान्यप्यात्मविन्यासवशादेवम्भावभावीन्येवोपतिष्ठन्ते नगादयोऽपि स्वीयोन्नत्यादनीदृशव्यवहारभूमयस्तद्धर्माभ्यामन्विताकाराः समाद्रियन्ते।

१४ आक्षेपान्तरपरिहारः।

न "चेन्द्रो मायाभिः पुरुरूप ईयत" इत्यत्रेन्द्रियवृत्तय एवात्र मायाशब्दार्था इत्येष उपपद्यते मन्त्रार्थः। बहुवचन[illegible]न हि पदेनानेन बहुतरवृत्तिमन्मायया किल स्वासाधारणकरणभूतया "इदं करणादित्याग्रायण इदं दर्शनादित्यौपमन्यव इन्दतेर्वैश्वर्य्यकर्मण" इति निरुक्तेः सर्वैश्वर्यशाली महेशो विश्वरूपधरो विज्ञायत इत्येवार्थस्य तीर्थकारसामान्योचितस्य वास्तवत्वात्। "मायिकत्वं पुराणेषु वैराग्यार्थमुदीर्य्यते। पुराणेषु तु प्रपञ्चस्य यन्मायिकत्ववर्णनं तद्वैराग्यार्थम्। दोषदृष्टेर्वैराग्यहेतुत्वात्" इत्याद्युक्तिरप्यस्ति मतानवबोधबाहुल्यशालिनी(नी)। परमेश्वरपरितृप्तये समनुष्ठितनिष्कामकर्म्मणामेव वैराग्यसम्पत्तिजननत्वात्। यथाऽऽम्नायते "परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेने" ति "शुध्यमानं तु तच्चित्तमीश्वरार्पितकर्मभिः। वैराग्यं ब्रह्मलोकादौ व्यनक्त्यथ सुनिर्मलमि" ति श्रीवार्त्तिककारपादाश्च प्राहुः। न हि तावद्दोषदृष्टिर्वैराग्यजननी। दृष्टदोषेषु कुर्वाणानामप्यकर्मपक्वकषायाणां वैराग्यसुदूरपराहतत्वात्। इतरथा द्यूतादिष्वविप्रतिपन्नदोषदर्शिना एव युधि-



ष्ठिरादयो न स्युरेव तेषु प्रवृत्ताः सुतराम्। प्रवृत्ता एव तु ते तत्रोत्तरकालीनकर्मसम्पत्त्यैव शुद्धिसम्पादिन्या पूता अभूवन्निति सुव्यक्तं भारतादिभ्यः। न च "परीक्ष्ये" ति श्रुतिः कर्मजन्यविविधगतिसञ्जातत्रासोपलालितवैराग्यमेवावेदयतीत्याशङ्कनीयम्। तल्लक्षणवैराग्योत्पादनमुखेन सत्त्वशुद्धिहेतुभूतनिष्कामकर्मस्वेव प्रवृत्तेर्माहात्म्यातिशयज्ञापकत्वाच्छ्रुतेरेतस्याः। एवञ्चाविद्याऽज्ञानापरपर्यायैव माया प्रत्यक्षानुमानागमादिभिः स्थिरतरेति स्थितेऽणुभाष्यविद्वन्मण्डनमार्तण्डप्राभञ्जनमारुतशक्तीनामपार्थाः पराकृता वेदितव्याः।

१५ अत्रार्थे रामानुजस्य गीताभाष्योक्तीनां निरासः।

यत्तु "दैवी ह्येषा गुणमयी" ति गीताभाष्ये गुणत्रयीमय्या मायायाः क्रीडाप्रवृत्तदेवनिर्माणक्रियाकर्मत्वमुक्त्वा "अस्या मायाशब्दवाच्यत्वमासुरराक्षसास्त्रादीनामिव विचित्रकार्य्यकरत्वेन दुरतिक्रमेति" विवृतं तत्र पुनः प्रमाणतया "ततो भगवता तस्य रक्षार्थं चक्रमुत्तमम्। आजगाम समाज्ञप्तं ज्वालामालि सुदर्शनम्। तेन मायासहस्रं तच्छम्बरस्याशुगामिना॥ बालस्य रक्षता देहमेकैकश्येन सूदित" मिति चोदाहृतं वचोजातं रामानुजेन तन्नोचितम्। न ह्यसौ माया देवनिर्मितेत्युपपद्यते। "अजामेका" मितिश्रुतावजात्वविशेषणेनैव तज्जातत्वस्यात्यन्तासंभवात्। नाप्यसावासुरराक्षसास्त्रादीनामिव विचित्रकार्य्यकरत्वेन मायापदवाच्यतामापद्यते। तदादिकार्य्याकरणदशायामपि तस्याः स्वरूपत एवाघटितघटनापटीयस्यास्तच्छब्दाभिधेयतायाः संक्लृप्तत्वात्। न वाऽस्त्रादीनामिव विचित्रकार्य्यकरत्वेनेत्युपमानोपमेयभावोऽस्त्रस्य च मायायाः सङ्गच्छते।

सत्वोपसर्जनराजसभावप्रयुक्तलावण्योपलालितकार्य्यैन्यकावेव विचित्रविशेषणसम्प्रतिपत्तेः । नतूभतरे कर्मणि तामसभावोपस्थापिते पुना रौद्ररसप्रधाने विचित्रपदप्रयोगो गुणायावकल्पते । न हीह " ततो भगवता तस्ये " ति वाक्यनिकरः प्रभवत्युदाहरणाय । सुदर्शनाद्यशेषायुधानां शस्त्रास्त्राणाञ्च तत्प्रयोक्तृदेवतानां तावच्चराचरसमधिष्ठात्रीणां बाह्याभ्यन्तरसामर्थ्यसामान्यमूलत्वान्मायायाः खलु चिच्छक्त्यनर्थान्तरभूतायाः । यद्यपि मायायास्तामसत्वद्योतनाय " ततो भगवता तस्य रक्षार्थं चक्रमुत्तम " मिति प्रसङ्गमधिकृत्य सुदर्शनमस्तौषीदप्रसङ्गसङ्गतमेष भाष्यकृन्मानी तथापि चक्रं हीदं मायाशक्तिशतसहस्रीज्वालामालालवस्याप्यालोकमनुभवितुं न क्षमते कथञ्चिदपीति प्रमाणवचसां घण्टाघोषः ।

यदप्ययमभाषन्मायाशब्दो न मिथ्यार्थवाची ऐन्द्रजालिकादिष्वपि केन चिन्मन्त्रौषधादिना मिथ्यार्थविषयायाः पारमार्थिक्या एव बुद्धेरुत्पादकत्वेन मायावीति प्रयोगस्तथा मन्त्रौषधादिरेव च तत्र माया सर्वप्रयोगेष्वनुगतस्यैकस्यैव शब्दार्थत्वादिति तदप्यनादेयम् । न तै स्याद्वास्तवप्रतिभासप्रतिबन्धेनावास्तवप्रतिभासप्रयोजिकां चावरणविक्षेपशक्तिद्वयसंशीलामविद्यामनिर्वचनीयत्वादिलक्षणलक्षितां मिथ्यात्वव्यक्तिं व्यक्त्यन्तरमर्थो जायते मायावाचो मनाग्वा । ये चैन्द्रजालिकान्स्वरूपतो जानन्ति ते च तेषां क्रियाकारकफलान्यपि ताद्रूप्येणैव यथावज्जानन्ति न तु तावत्तांस्तात्त्विकक्रियासंयोजकतया जातु चित् यते एतान्पारमार्थिक्याः किल बुद्धेरुत्पादकतया जानीयुः अपि त्वलीकार्थकारितयेति । सा च क्रिया कालत्रयेऽपि मायोच्यते ।



तद्योगादेव ते गीयन्ते मायाविन इति । एतावता मायाशब्दो मिथ्याभावमाच्येवोपनमते । उपक्रमपरामर्शोपसंहारैरुदाहृतसामन्याः सर्वस्या एव मायामयीत्वात् । न ह्यत्र मन्त्रौषधादिरेव माया । मायिकप्रक्रियासम्भारसामान्यस्य तत्पदवेद्यतातिरिक्तवेद्यताऽनाक्रान्तत्वात् । अनयैव दिशा मायाऽनुगमः सर्वत्रैव सन्सद्विविक्तताक्षणमिथ्यात्वमवगच्छन्त्येवावगन्तारः सूक्ष्मदृशो महाधीराः । न च मिथ्यार्थेषु मायाशब्दप्रयोगो मञ्चाः क्रोशन्तीति वदौपचारिक उपजायते । जाग्रदादिकालीनमतिविक्रियाविशेषरूषिताविषयावल्यात्मना समुन्मिषन्मायातन्त्रेषु हि प्रमाणप्रमेयप्रमातृप्रमितिषु स्वकाले सांव्यवहारिकैर्मिथ्याबुद्धिमकुर्वाणैरपि सुषुप्तिसमाध्योस्तद्वत्तामेव निश्चिन्वानैरसङ्कुचितमिथ्याबुद्धिप्रत्ययधाराया एवानुभूयमानतयाऽनवकाश एवौपचारिकमनःकल्पनावारविलासिन्या यतः । एवञ्च विषमोऽयमुपन्यासो मञ्चाः क्रोशन्तीति पर्य्युपेयते यदेषा मिथ्यार्थेषु तद्बुद्धौ च तुल्यतयैव मायायाः प्रवृत्तिप्रसारसमास्कन्नता ननु स्वारसिकी । मञ्चेषु क्रोशनकर्तृकृषीवलनिलयतयैकार्थ्यसम्पादनाधीनयोग्यतावत्त्ववन्मिथ्याधीसमा[illegible]रगोचरे द्रागेव वस्तुनि समस्ते तद्वत्वमभ्याहृतमतो मुख्यत्वौपचारिकत्वादिभेदभिन्नतरतमभावावगाहिविनिगमकविशेषो न विशिष्यते । इतरथाऽज्ञादिविशेषणैर्व्यापिका हीयं परिच्छिन्ना स्यान्माया । न चेष्टापत्तिः । उदाहृतश्रुतिस्मृतिव्याकोपात् । न चैषा गुणमयी माया पारमार्थिकीति साम्प्रतम् । व्यभिचरद्रूपेतररूपात्मकालिङ्कानालिङ्कितत्वात् । तथा च पैङ्गलास्समामनन्ति । " न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः । न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थते " ति ।

एषा तु ब्रह्मनिष्ठैव । तस्यास्य व्यावर्त्तमानास्वप्यवस्थासु जाग्र-
दादिकास्वेकरूपेणानुवर्त्तमानत्वात् । यथा चाम्नायते तैरे-
" वैक एवात्मा मन्तव्यो जाग्रत्स्वप्नसुषुप्तिषु । स्थानत्रयव्यती-
तस्य पुनर्जन्म न विद्यत " इति । अयमेवात्र " मामेव ये प्र-
पद्यन्ते मायामेतां तरन्ति त ", इत्युत्तरार्द्धनिर्धारिताखिलानर्थ-
सम्बाधिमायातिक्रममहामहिमा हि सर्वोपाधिनिवृत्त्युपहितस-
च्चिदानन्दघनैकलक्षणस्वस्वरूपावस्थानापरनामा मोक्षाख्यः स-
माख्यायते । तथा च श्रूयते । " तस्य ह न देवाश्च नाभूत्या
ईशत आत्मा ह्येषां सम्भवति । ब्रह्मविद्ब्रह्मैव भवति । अभयं
प्रतिष्ठां विन्दते । एतमानन्दमयमात्मानमुपसंक्रामती " ति ।
एतेन ये सत्यसङ्कल्पादिलक्षणं शरणं वृजन्ति मां त एते माया-
मुत्सृज्य मामेवोपासत इत्यन्ता युक्तयो भाष्यगता रामानुजस्य
प्रत्याख्याता अध्यवसातव्याः । यथोपासना मानसीनतया ना-
स्ति मुक्तेर्हेतुर्हेतुस्तत्राखण्डार्थैव धीस्तथेदं श्रीभाष्यगानामेव
गिरां निरासपूर्वं कल्पपादितं त्रिदण्डिमतविभेदिन्या अधिगम्य-
तां तावत्पुरुषार्थसञ्जीविन्याश्च । मायाया आश्रयत्वविषय-
त्वानिर्वचनीयत्वादिगोचरा अपि शङ्कास्तयोरादित एव वारिता
विज्ञातव्याः । इत्थञ्च मायावादो वैदिकोऽस्यैव तु सच्छास्त्रता
वहिरन्तश्चामृतरसातिशाय्यास्तिक्यरसातिशयस्यन्दिशैववैष्णवा-
दिस्तोत्रपरामृतसरोवरमाहात्म्यपरिचिन्तया भगवच्चरणानां ततो-
व्यतिशयितसत्ताशालिषोडशभाष्यवचनमधुरिम्णा च वैदिकत्व-
मौलिमन्दारसुमनोमहागन्धस्यैव श्रद्धाभक्तिध्यानयोगाद्यत्यास-
ङ्गस्योद्गारसमीरसमाश्रयस्य सिद्धत्वे कोऽन्वत्रावसरः प्रच्छन्नबौ-
द्धतायाः । अनेवंविधस्य तु प्रच्छन्नं बौद्धमित्येवंविधतामापाद्य



दुष्यन्मना मानवो बौद्धवृद्धप्रपितामह एवानुभूयते बुद्धिमद्भिः ।
तत्रैव " मयैव कथितं देवि कलौ ब्राह्मणरूपिणे " त्युत्तरार्द्ध-
मसूयावतोऽप्यग्रे गच्छतो वृत्तमननुसन्दधतो विस्मरणशीलतां वि-
ज्ञापयति यतो भूतार्थकक्तप्रत्ययान्तमेव कथितमिति प्रायुङ्क्त
पदं तदेतदवृत्तकथनाभिधायीव वस्तुवृत्त्या । पुराणप्रवृत्त्यधिकर-
णद्वापरकालोत्तरकलिकालाऽवच्छेदेन ब्राह्मणरूपेण च कथनप्र-
सक्तौ " मयैव वक्ष्यते देवी " त्ययमेव प्रयोगो युक्तः स्यात् ।
न च कलीनामानन्त्याद्व्यतीततदभिप्रायकं चैतदिति भ्रमितव्यम् ।
कलावतीते वाऽतीततरे श्रीमत्पूज्यपादावतारयोजकवाक्यानुप-
लम्भात् । प्रत्युत " करिष्यत्यवतारं हि जम्बुद्वीपे कलौ युग "
इत्यवतारकलिपदयोर्द्वितीयासप्तम्येकवचनान्तयोरेव मार्कण्डेयपु-
राणस्थयो " श्चतुर्भिस्सहशिष्यैस्तु शङ्करोऽवतरिष्यती " त्य-
नागतकालीनक्रियापदप्रयोगसहभावितयोरत्यन्तमुपलब्धेः । एवं
हि " मायावादमसच्छास्त्रमिति " शब्दसमूहो विचारविधुरभा-

१६ एतावता मा-
यावादमिति वच-
नानामलीकार्थक-
तात्पर्य्यवसानस-
सिद्धिरद्वैततरवा-
दिनाञ्च ।

वग्राही चार्वाचीनमानुषापसदासूयामात्रनिर्मि-
तोऽवधार्य्यते प्रत्यक्षरम् । न त्वेता वाचो
व्यासाचार्य्याणां नूनं तत्पुराणस्य निर्मातॄणा-
म् । क कस्तूरिकासुगन्धः क वा कूष्माण्डपू-
तिगन्ध इति विभावनीयमस्याः पदपङ्क्तेर्दौर्भाग्यं सुधीभिः ।
तथा चेर्ष्यावानपि पदपदार्थप्रयोगानुसन्धानहीन एवासीदयं वा-
क्यप्रक्षेप्तेति स्थितम् । एतावता निरूपणेन श्रीमन्महेश्वरापराव-
तारभगवत्पूज्यपादैरेव त्रिलोकीवन्दितचरणारविन्दैराद्यान्तितमद्वैतं
मायावादाद्यनेकावान्तरप्रक्रियाऽवयवं, भवति हि वैदिकं पुनरन-
वधिकातिशयाऽऽनन्दस्वरूपभूतकैवल्यजननम् । नेतरद्विशिष्टा-

द्वैतशुद्धाद्वैतद्वैताद्वैतद्वैतादिभेदभिन्नमानवसामान्यमतिमान्द्यदुर्वास-
नाङ्कासितं वस्तु कल्पान्तेऽपि । वेदबाह्यसमाचारसामान्यचिन्त्रि-
तत्वान्मतानामेतेषामिति नाभिनवं परीक्षकाणाम् ।

अथ प्रतिष्ठापितेऽप्येवमुदितार्थप्रामाण्ये तद्विरोधितमः-

१७ अथ श्रीमद्भगवत्पूज्यपादावतारसमयावतरणिका।

स्तोमदीव्यन्महसो भगवत्पादाः किङ्कालिकी-
स्माऽवतरणाः किं वाऽत्र मानमिति । अत्रा-
भिधीयते । युधिष्ठिरशकस्य द्विसहस्रषट्शतोत्तरैकत्रिंशत्तमेऽब्दे
२६३१ वैशाखशुक्लपञ्चम्यां श्रीमन्महेशज्ञानावतारमहोत्साह
आबभूवेति । शकाब्दा ह्येते श्रीमद्युधिष्ठिरस्य समूाजस्त्रिसह-
स्र्युत्तरपञ्चाशत् ३०५० परिमिताः सन्नियतास्तेषान्तूदीरिता-
ऽवशिष्टाभिस्समं समाभिश्चतुश्शतोत्तरैकोनविंशतिसंख्याभिस्त-
दुत्तरा विक्रमार्कीया एकोनविंशतिशतोत्तरचतुःपञ्चाशत्सङ्ख्या-
काः संभूयाद्य त्रयोविंशतिशतोत्तरत्रिसप्ततिपरिमिताः समाः सं-
ख्यायन्ते । मानञ्चात्रात्रभवच्छ्रीमच्छारदापीठजगद्गुरुवंशाव-
लीसल्लेखो ह्यविच्छिन्नदेशिकपुरुषर्षभप्रणालीनिजाधिकारास्तिता-
भिधायी । तेन चाद्यावध्येकसप्ततिः पुरुषा भगवद्भाष्यकार-
वार्त्तिककारसङ्क्षेपशारीरककारतत्वप्रदीपिकाकारमिताक्षराकारा-
द्वैतसिद्धान्तसिद्धाञ्जनकारादयो द्वारकाशारदापीठसिंहासना-
सीना अराजन्तेति सुस्पष्टम् । स्वस्वसमयाऽवच्छिन्नश्रीमत्सुध-
न्व विजयानन्तदेव विक्रमादित्यदेव भोज नृग नूतनभोजाशोकचन्द्र-
गुप्त शङ्करवर्म सर्वजिद्वर्म पुरोगमानां तावदद्यावधिकसार्वभौम-
मण्डलेशपदालङ्कृतानामानुशासनिकताम्रफलकादिलेखविभेदास्त-
त्पीठसरस्वत्यालयविलसन्तश्चावतारवत्सरसङ्ख्यां भगवतां प्र-
मापयन्ति तराम् । पीठपुरुषाणामशेषाणामेवाभिषेकलक्ष्मीभावना-



सराभ्यां प्रार्थक्येन विनिबद्धानां सम्प्रत्ययादेवार्थस्यास्य व्य-
क्ततरा प्रतिपत्तिः ।

ननु विचारकाग्रयायिभिर्भूयोभिर्भगवतामवतारवासर-

१८ अभिहितनिर्णयविशेषविषये भगवतामवतारसमयेऽर्वाचीनशोधकजनोपन्यासास्तत्परीहारोपन्यासाश्च सप्रमाणम्।

स्यात्यल्पकालावयवसमवायिन एवावधारितत-
या कुतोऽसावुक्तिस्तावकीना समाश्वस्यताम् ।
न खल्वसौ दोषः । मानैरुन्नीतस्यार्थस्य यु-
क्त्याभासैरन्यथयितुमशक्यत्वात् । तानि त्व-
दर्शयमेव बलवन्त्यत्र मानानि । इतोऽपि
तान्यधिकतरशुश्रूषायां श्रावयिष्यामः सोत्साहम् । सम्प्रति तु
यानि ह्याकर्ण्य वाक्यानि “ निधिनागे भवन्ह्यब्दे विभवे मासि
माधवे । शुक्ले तिथौ दशम्यान्तु शङ्कराच्योंदयः स्मृतः । प्रा-
सूत तिष्यशरदामतियातवत्यामेकादशाधिकशतोनचतुःसहस्र्या-
मि ” त्यादीनि विक्रमादित्यसमयसमनन्तरं किलाष्टशत्यु-
त्तरपञ्चचत्वारिंशत्तमे ८४५ वत्सरे त्रिसहस्र्युत्तराष्टशत्युत्तरतर-
नवमा ३८८९ नन्ये कलियुगस्यासीदवतरणं भगवतामिति
निश्चिन्वानाः पुनरन्ये न्यूनं तस्मादधिकं किञ्चिद्विलिखन्तो वि-
ज्ञायन्ते नानाविधाः शोधकम्मन्याः । तान्प्रतिब्रूमो
नायं निर्णयो युष्माकं न्याय्य इति । वाक्यव्यक्तीनाममूषां
श्रीमच्छारदापीठपूर्वदेशिकवराणां नामात्रभवन्नृसिंहाश्रमपादाना-
मेव यथावद्विषयीकरणात् । न तु जातु भगवत्पूज्यपादाः
कथमपि तासां गोचराः । तेषां तत्कालाऽनवच्छिन्नत्वात् ।
तदवच्छिन्नास्तु तत्पीठाध्यक्षा नृसिंहाश्रमचरणाः । तेभ्य एव
तु गुर्जरमण्डलाधीशसर्वजिद्वर्मणा समर्पितस्य हि ताम्रफलकस्य
नवशतोत्तरैकचत्वारिंश ९४१ त्तमविक्रमाब्दीयवैशाखशुद्ध चतु-

ध्यां सन्नातस्य पीठे तस्मिन्नधावधिसम्प्रत्ययात् । तस्मिन्नुदाहृतकालस्य च यथोक्तवंशावल्यवधृतश्रीनृसिंहाश्रमचरणानामस्तित्वस्य वैषम्याभाव एवास्ति विमृमापहतौ । काले किल तस्मिन्नेवाचार्य्यचरणास्ते निजविजययात्रायां द्राविडमहारायकस्मै निवृहच्चरणवर्गीयब्राह्मणप्रदानाय देवकोपस्यापि तस्माऽवज्ञाविधायिने पाशपक्षतिकारुणिका अपि । शापोऽयमग्रहारं तमेतं हन्त ददाह मुनिमानाज्ञानुचारिकतिपयश्रोत्रियमानववर्गवर्जमासमन्तात् । सोऽयं श्रोत्रियवर्गो देशिकेन्द्रदयौदार्य्यादिगुणविशेषपात्रभूतः सन् उत्तरकालमान्ध्रभूमिकायाः श्रीकालहस्तिमण्डले परं पुदूरग्रहारे सप्तगोदावरमण्डले पुनः कोनसीमि [illegible] प्रान्ते च जनपदेषु कृतपदः सन् "पुदूरुद्राविडाः" "कोनर्सीमद्राविडाः" "आरामद्राविडा" इति तद्वर्गीयास्तदाप्रभृत्याख्यायन्ते शिष्टगणाः । गाथा किलेयं तत्कालीनतत्पुरुषीयतालपत्रिकापुस्तलेखविलेखनैर्विस्पष्टं विज्ञायते प्रसङ्गसङ्गत्यात्रैव विचारणाशीलैभिरद्यावधि । सेयं गाथा श्रीमन्नृसिंहाश्रमचरणानां तात्पर्यं यथावत्प्रमापयत्युदिततात्रफलकवंशावलीसन्नियतत्व्यवस्थानुगुण्येनैव निर्विशङ्कम् । किञ्च गुर्जरमण्डले [illegible] पत्तनगरीसम्प्रतीयमानजैनपुस्तकालयगतनिबन्धविदमेदेभ्यस्तदानीन्तनबृहस्पतिसूरिमहाभेरपुरं नामैतत्समयं नृसिंहाश्रमपादानामासीज्जनु वादातिवादमहोत्साहो महता समारम्भेणेति विस्पष्टम् । ततः प्राचार्य्याणामपि तत्तत्कालीनावनिपालसमर्पितानुशासनविशेषपात्रमयनिर्णयो निराबाध एव वंशावलीसमैकात्म्यसमापन्नः सम्मीयते । एवञ्च त्रयोदशोत्तरमंकसहस्रवत्सरा १०१३ व्यतीयुर्नृसिंहाश्रमचरणानामिति स्थिते भगव-



तां तावत्प्राच्यकृतां ततः प्रागष्टाविंशतिपूर्वदेशिकपूर्वपादिनामुदीरितत्रिसप्तत्युत्तरत्रयोविंशतिशताब्दा २३७३ अमुनक्रमेणेति वंशावल्या किल श्रीमद्द्वारकाशारदापीठ [illegible] माचार्य्यपरम्परासमायातयाऽवधार्य्यते यथावत् । तत्र भगवतारदिनमारभ्य स्वधामप्रवेशपर्य्यन्ता हि सर्वैवावतारचर्य्या प्राग्भिः समुदाहृताऽस्ति । सेयं वंशावली यथा । श्रीचिन्तामणिगणपतये नमः । श्रीतिलकस्वामिने नमः । श्रीमहाविष्णवे नमः ॥ अस्य मातृकाया अतिजीर्णतया गलिताक्षरप्रायत्वाद्विश्वरूपाश्रमपर्य्यन्तानप्याचा-[1] र्य्यानवीनानन्तर्गत्य पत्रिकेयं प्रकाशिता अभिनव ॥ युधिष्ठिरशके २६३१ वैशाखशुक्लपञ्चम्यां श्रीमच्छङ्करावतारः । २६३६ चैत्रशुक्लनवम्यामुपनयनम् । २६३९ कार्त्तिकशुक्लैकादश्यां चतुर्थाश्रमस्वीकारः । २६४० फाल्गुनशुक्लद्वितीयायां श्रीमद्गोविन्दभगवत्पूज्यपादाचार्य्याणां [illegible] आरम्य २६४६ ज्येष्ठ [illegible] पर्यन्तं [illegible] षोडशभाष्यप्रणयनं श्रीनारायण [illegible] ज्योतिर्मठनिर्माणम् । २६४७ कार्त्तिकशुक्ला [illegible] श्रीमद्बादरायण [illegible] वाराणस्यां ब्रह्मविद्यारहस्य [illegible] नन्दनाचार्य्याणां समागमश्च । २६४७ मार्गशीर्षकृष्णतृतीयायां श्रीमन्मण्डनमिश्रैः सार्कं वादारम्भः । [illegible] ६४८ चैत्रशुक्लचतुर्थ्यां मण्डनपराजयः । २६४८ चैत्रशुक्लषष्ठ्यां सरस्वत्या सह [illegible] प्रसङ्गः । २६४८ [illegible] म्याममरुकाप्रवेशः । २६४८ कार्त्तिकशुक्ल [illegible] देहप्रवेशः । २६४८ कार्त्तिक [illegible] प्रतिपदि विमर्श [illegible] कं [illegible] श्रीचिन्तामणिमन्त्रेण द्वाराधामाकर्षणम् ।

[1] भगवत्पादावतारचरितावली श्रीमन्नृसिंहाश्रमपर्यन्ता अत्र गुरुनामावली च ।

२६४८ कार्तिकवद्यपञ्चम्यां तत्र तस्याः स्थापनम् । कार्तिकवद्यत्रयोदशीमारभ्य माघशुक्लदशमीपर्य्यन्तं तत्रैव द्वारवत्यां शारदापीठनिर्माणं बौद्धादिपराजयः० रुद्रमाठाकारेण भगवदालयनिर्माणं यादवेन्द्रप्रतिष्ठा सिद्धेश्वरस्य मन्दिरनिर्माणं भद्रकालीयम्योद्धारश्च । २६४८ फाल्गुनशुक्लनवमीमारभ्य शृङ्गगिरौ मठस्थापनम् । २६४९ चैत्रशुक्लनवम्यां श्रीमन्मण्डनमिश्राणामुत्तमाश्रमदीक्षा श्रीसुरेश्वराचार्य्या इति योगपट्टश्च । २६४९ मार्गशीर्षशुक्लदशम्यां श्रीमत्सुधन्वनः सार्वभौमस्य शिष्यत्वेन परिग्रहः । २६४९ माघशुक्लसप्तम्यां श्रीमत्सुरेश्वराचार्याणां द्वारवत्यां शारदापीठेऽभिषेचनम् । २६५० वैशाखशुक्लतृतीयामारभ्य दिग्विजयमहोत्सवारम्भः । तदन्तराले हि २६५३ तथा ५४ श्रावणशुक्लसप्तम्याश्विनशुक्लैकादश्योः श्रीमत्तोटकहस्तामलकाचार्य्ययोः शिष्यत्वेन परिग्रहः । २६५४ पौषशुक्लपौर्णिमायां श्रीहस्तामलकाचार्याणां शङ्करपीठाभिषेचनं तद्दिन एव श्रीतोटकाचार्याणां ज्योतिर्मठाभिषेचनसङ्केतः २६५५ वैशाखशुक्लदशम्यां दिग्विजयान्तराले पुरुषोत्तमक्षेत्रं प्रति गमनं तत्र दारुमयस्य जगदीशस्य प्रतिष्ठापनं तत्पुरि गोवर्धनमठस्थापनं श्रीपद्मपादाचार्य्याणां तत्पीठाभिषेचनञ्च । २६५५ भाद्रपदशुक्लपौर्णिमामारभ्य २६६२ पौषशुक्लामावास्यापर्यन्तमविच्छिन्नदिग्विजयमहोत्सवे बौद्धजैनादिभिः सहचरैकसहस्रमतानामुपमर्दनं सुधन्वप्रमुखान्हि राज्ञः प्रति सम्यक्प्रजापालनाद्याज्ञापनं अनादिवर्णाश्रमविहितवैदिकधर्ममर्यादाव्यवस्थापनं निखिलयोगमाहात्म्यप्रकटनं अशेषजनरञ्जनं एवं भूलोकसमुद्धारः ततः काश्मीरमण्डले शारदा-



पीठवासः तदनु २६६२ कार्तिकशुक्लपौर्णिमायामशेषजगदुद्धारका भगवन्तो महेश्वरापरावतारश्रीमच्छङ्करभगवत्पूज्यपादा ब्रह्मादिदेवतागणसम्प्रार्थिताः सन्तो निजदेहेनैव विमानाऽऽरूढाः श्रीकैलासं निजधाम प्राविशन्निति सकलप्रमाणग्रन्थाशयो गुरुपरम्पराऽनुश्रवणञ्च तदाऽऽरभ्य जगद्गुरुपरम्पराप्रवृत्तिः । तत्र प्राथमिकशारदापीठस्थाश्रमसम्प्रदायिजगद्गुरुपरम्पराप्रवृत्तिः । १ श्रीब्रह्मस्वरूपाचार्याः ( श्रीसुरेश्वराचार्याः ) २६९१ चैत्रवद्याष्टमीपर्य्यन्तम् । २ श्रीचित्सुखाचार्याः २७१५ पौषशुक्लतृतीयापर्य्यन्तम् । ३ श्रीसर्वज्ञानाचार्याः २७७४ श्रावणशुक्लैकादशीपर्य्यन्तम् । ४ श्रीब्रह्मानन्दतीर्थाः २८२२ श्रावणशुक्लप्रतिपत्पर्य्यन्तम् । ५ श्रीस्वरूपाभिज्ञानाचार्याः २८९० ज्येष्ठवद्यामावास्यापर्य्यन्तम् । ६ श्रीमङ्गलमूर्त्याचार्याः २९४२ पौषशुक्लचतुर्दशीपर्य्यन्तम् । ७ श्रीभास्कराचार्याः २९९५ पौषशुक्लचतुर्दशीपर्य्यन्तम् । ८ श्रीप्रज्ञानाचार्याः ३००८ आषाढशुक्लसप्तमीपर्य्यन्तम् । ९ श्रीब्रह्मज्योत्स्नाचार्याः ३०५० चैत्रवद्यचतुर्थीपर्य्यन्तम् । १० श्रीआनन्दाविर्भावाचार्याः विक्रमशके २ फाल्गुनशुक्लनवमीपर्य्यन्तम् । ११ श्रीकलानिधितीर्थाः ८२ पौषशुक्लषष्ठीपर्य्यन्तम् । १२ श्रीचिद्विलासाचार्याः ११९ मार्गशीर्षशुक्लत्रयोदशीपर्य्यन्तम् । १३ श्रीविभूत्यानन्दाचार्याः १५४ श्रावणवद्यैकादशीपर्य्यन्तम् । १४ श्रीस्फूर्तिनिलयपादाः २०३ आषाढशुक्लषष्ठीपर्य्यन्तम् । १५ श्रीवरतन्तुपादाः २४९ आषाढवद्यतृतीयापर्य्यन्तम् । १६ श्रीयोगारूढाचार्याः ३६० मार्गशीर्षवद्यैकादशीपर्य्यन्तम् । १७ श्रीविजयडिण्डिमाचार्याः ३९४ पौ-

षवद्याष्टमीपर्य्यन्तम् । १८ श्रीविद्यातीर्थाः ४३७ चैत्रशु-
क्लप्रतिपत्पर्यन्तम् । १९ श्रीचिच्छक्तिदेशिकाः ४८३ आ-
षाढशुक्लद्वादशीपर्य्यन्तम् । २० श्रीविज्ञानेश्वरतीर्थाः ५१०
आश्विनशुक्लपूर्णिमापर्य्यन्तम् । २१ श्रीअमरेश्वरगुरवः ६०८
भाद्रपदवद्यषष्ठीपर्य्यन्तम् । २२ सर्वतोमुखतीर्थाः ६६९ पौष-
कृष्णचतुर्थीपर्य्यन्तम् । २३ श्रीआनन्ददेशिकाः ७२१ वै-
शाखवद्यपञ्चमीपर्य्यन्तम् । २४ श्रीसमाधिरसिकाः ७९९
फाल्गुनशुक्लद्वादशीपर्य्यन्तम् । २५ श्रीनारायणाश्रमाः ८१६
चैत्रशुक्लचतुर्दशीपर्यन्तम् । २६ श्रीवैकुण्ठाश्रमाः ८८९ आ-
षाढवद्यषष्ठीपर्यन्तम् । २७ श्रीत्रिविक्रमाश्रमाः ९११
आषाढशुक्लतृतीयापर्य्यन्तम् । २८ श्रीनृसिंहाश्रमाः ९६०
जेष्ठवद्यचतुर्दशीपर्य्यन्तम् । एवंविधाविस्पष्टप्रतीतिविषयाण्य-
वतारकार्याणि सन्नियतसमयसमालम्बीनि भगवतामथ तत्परम्प-
रया नार्वाचीनपरोक्षपरीक्षणैः शक्यन्ते व्यभीकर्तुं नाप्युदा-
हरणप्रत्युदाहरणान्यधुनातनशोधकम्मन्यानामनपवदनीयपीठव्यव-
हारविलोपनायालं लेशतो वा । न ह्येषां शोधनान्यापातप्रती-
त्यापन्नानि प्रत्याययितुं पीठतत्वं प्रभवेयुः । पीठगतानामेषानपनो-
दनीयव्यवहाराणां तत्संस्थासामान्यसम्पादनाशीलत्वात् । न हि न-
यनाभ्यामभ्यर्हितो रूपसाक्षात्कारः श्रोत्राभ्यां शक्यते विधातुं न वा
श्रोत्राभ्यां सङ्कल्पसरशब्दसाक्षात्कारश्चक्षुर्भ्यामिन्द्रियैर्वा इतरैः ॥
तथाच पीठव्यवहारा एव सन्नियन्तुस्तत्परम्परायाश्च याथार्थ्या-
ऽवधारणसमर्था भवन्ति नेतरे पुनः सहस्रं वा तद्विरोधिनश्शोध-
नाभासाः । न चैतावता शोधनधर्माणस्ते निर्मूला एवेति वदामः
किं तर्हि भगवद्भाष्यकारेतरदेशिकपुरुषानेव विशिष्टगुणालीसम-



लङ्कृतान्नाम यथोपदर्शितोदाहरणप्रत्युदाहरणबलाद्विषयीकुर्व-
न्ति सममेकमिति । यथा स्तोत्रनिकरो हरिहरादिदेवतागोचरः
शतशः श्रूयमाणः सर्वोऽपि नास्त्येव कृतिरद्धा भगवतां भाष्य-
कृतां अपि तु तन्नाम्ना व्यवह्रियमाणानां तत्स्थानापन्नपूर्वा-
चार्य्याणामेवेतरेतरविभिन्नकालिकानां तावद्रचनाविन्यासविभेदै-
र्ज्ञापकरूपैरवधार्य्यन्ते । तथैवेह नाम्ना हि भगवतामभ्युदि-
ताः सम[illegible]दिव्यवहाराः पीठाधिपतीनेवोत्तरोत्तरान्विज्ञापयन्तीति
स्थितम् । नोत्सहन्ते बाधितुमुदाहरणाभासाः । गत्यैव पुनरेत
या श्रीमन्नृसिंहाश्रमपादानारभ्याद्यावधिकशारदापीठचतुश्चत्वारिं-
शत्सङ्ख्याकदेशिकव्यवहारा अनुगम्यन्ते निरन्तरायम् । विष-
यस्य किलास्य प्रमापकतरं तावत्सुधन्वनस्ताम्रफलकमबाधितास-
न्दिग्धसमयसन्नियन्तृ च भाष्यकृतां भगवतामिहोदाह्रियते ।

तथाहि— श्रीमहाकालनाथाय नमः ।

श्रीमहाकाल्यै नमः ।

ताम्रशासनं सुधन्वनः सार्वभौमस्य ।

श्रीमत्सदाशिवापरावतारमूर्ति च-
तुष्षष्टिकलाविलासविहारमूर्ति
बौद्धादिसर्ववादिदानवनृसिंहमू-
र्ति वर्णाश्रमवैदिकसिद्धान्तो-
द्धारकमूर्ति मामकीनसाम्रा-
ज्यव्यवस्थापनमूर्ति विश्वेश्वरवि-
श्वगुरुपदजगज्जेगीयमानमूर्ति नि-
खिलयोगिचक्रवर्त्ति श्रीमच्छ-
ङ्करभगवत्पादपादपद्मयोः ।

भ्रमरायमाणसुधन्वनो मम सोमवंशचूडामणियुधिष्ठिरपारम्पर्य्यप-

रिप्रासमारतवर्षस्याञ्जलिबन्धपूर्विकेयं राजन्यस्य विज्ञप्तिः । भगवद्भिर्दिग्विजयोऽकारि । सर्वे वादिनः पराकृताः । सर्वे वर्णा आश्रमाश्च कृतयुगवत्पूर्णे वैदिकाध्वनि नियोजिताः सन्तो यथाशास्त्रमाचरन्ति हि धर्मम् । ब्रह्मविष्णुमहेश्वरमहेश्वरीस्थानान्यशेषदेशवर्त्तीन्युद्धृतानि । सर्वं ब्रह्मकुलमुद्धारितम् । विशिष्यासमद्राज्यकुलमान्वीक्षिक्याद्यशेषराजतन्त्रपरिशीलनेनोन्नीतं भवति । ब्रह्मक्षत्राद्यस्मत्प्रमुखनिखिलविनेयलोकसम्प्रार्थनया चतस्रो धर्मराजधान्यो जगन्नाथ-बदरी-द्वारका-शृङ्गर्षिक्षेत्रेषु भोगवर्धनज्योतिश्शारदाशृङ्गेरीमठापरसञ्ज्ञकाः संस्थापिताः । तत्रोत्तरदिशो योगिजनप्राधान्येन धर्ममर्यादारक्षणं सुकरमेवेति ज्योतिर्मठे श्रीतोटकापरनाम्नः प्रतर्दनाचार्यानथ शृङ्गर्ष्याश्रमे शृङ्गर्षिसमस्वभावान्पृथ्वीधराभिधेयहस्तामलकाचार्यान् भोगवर्धने स्वत एवाभिमतत्वेनात्यन्तोग्रस्वभावानपि सर्वज्ञकल्पपद्मपादापरनामसनन्दनाचार्यानथ बौद्धकापालिकादिसकलवादिभूयिष्ठपश्चिमस्यां दिशि वादिदैत्याङ्कुरः पुनर्माभवत्विति शारदापीठे किल द्वारकायां जैनैरुत्सादितवज्रनाभनिर्मितभगवदालयादिदुर्दशां दूरीकृत्य भगवद्भिस्त्रिलोकसुन्दरनाम्ना पुनस्सन्निबद्धभगवदालयश्रीकृष्णादिसकलमर्यादासुसंस्कृतायामधिगताशेषलौकिकवैदिकतन्त्रविश्वविख्यातकीर्तिसर्वज्ञानमयाग्निविश्वरूपापरनामसुरेश्वराचार्यांश्चास्मत्सर्वलोकाभिमतिपूर्वकमभिषिच्यैवं चतुर्भ्य आचार्येभ्यश्चतस्रो दिश आदिष्टा भारतवर्षस्य । त एते तत्तत्पीठप्रणाय्या निजनिजमेव मण्डलं गोपायन्तो वैदिकमार्गमुद्भासयन्तु । सर्वे वयं तत्तन्मण्डलस्था ब्रह्मक्षत्रादयस्तत्तन्मण्डलस्यैवाचार्यस्याधिकाराधिकृता वर्तिष्यामहे च । महद्भिर्निर्णयप्रसक्तौ तु सुरेश्वरा-



चार्या एवोक्तलक्षणतः सर्वत्रैव व्यवस्थापका भवन्तु भगवतामनुशासनाच्च । अस्मद्राजसंस्थैव निरङ्कुशगुरुसत्ताप्युक्तमर्यादया जगत्यविचलं विचलतु । परिव्राजको हि महाकुलीनस्त्ववैदुष्यादिविशिष्टाचार्यलक्षणैरन्वित एव श्रीभगवत्पादपीठानामधिकारमर्हति न तु विनिमयेनेत्येवमादिनियमबन्धो भगवदाज्ञासमवबुद्धस्समस्तैरथास्मदादिब्रह्मक्षत्रादिवंशोद्भवैः परमप्रेम्णोत्तमाङ्गेनाद्रियत इत्येतां विज्ञप्तिमङ्गीकुर्वन्तु भगवन्त इति स्वस्त्यस्तु लोकेभ्यः । युधिष्ठिरशके २६६३ -आश्विनशुक्ल १५ ।

## सुधन्वा सार्वभौमः ।

शासनेन किलानेन ज्योतिर्मठे श्रीतोटकाचार्याः शृङ्गगिरौ श्रीहस्तामलकाचार्या गोवर्धनपीठे श्रीपद्मपादाचार्या द्वारकायां पुनश्शारदापीठे वार्त्तिककारश्रीमत्सुरेश्वराचार्यास्सुधन्वादिशिष्यपर्षत्सम्मत्याऽप्यभिषिक्ता भगवद्भिरिति वार्तिककारास्तु चतुर्णां तत्तत्कालीनापूर्वार्थव्यवस्थापनप्रभवश्चाभवन्नशेष एव भारते वर्षे भगवदाज्ञाप्यकारा इवेत्यध्यवस्यामो यथाशब्दम् । चतुर्णामपि पीठानां चत्वारो भागा भारतवर्षस्यात्मपरम्परया शास्यत्वेन विभक्ता इतीदमादौ स्थिते निर्णये यथोपन्यस्तभगवत्पूज्यपादाऽवतारसमयोऽप्यन्यूनानतिरिक्ततयाऽभ्रान्तमधिगम्यते । नातः परतरं मानं जानीमोऽत्र लेखकं कस्यचिद्वा यत एतस्यार्थस्यानुवादकन्नु ताम्रफलकं भोजस्य तत्पीठस्थं रैवताद्रिराजधानीपूर्वामात्यानुवा-

सुधन्वनस्ताम्रपत्रिकयाऽप्यनया चतुर्णामपि पीठानां मूलाचार्यादिनिर्णयावगमो वार्तिककारपरमौन्नत्यञ्च ।

दान्तरसचिवं पुनर्बृहद्राजतरङ्गिणीसमुद्गीतभाष्यकारसुधन्वसमयोल्लेखनानुकूलं वस्तुवृत्या । तत्रैव तरङ्गिण्यां सुधन्वनस्तनूभवपरम्परायां नवमस्य हि महाराजस्यावन्तिकाया दौहित्रतया समाख्यायते विक्रमादित्यः । उदाहरणमेतद्वा यथोक्तमेव कालं तावद्भाष्यकृतां प्रमापयत्यत्युच्चैः । सुधन्वा हि महाराजशिष्याग्रणीर्भगवतामासीदिति दिग्विजयादधिगम्यते । यथोक्तम् " अपि शिष्यवरैर्युतः सहस्रैरपि राज्ञा ससुधन्वना हि तेन । ककुभो विजिगीषुरेष सर्वाः प्रथमं सेतुमुदारधीः प्रतस्थे " इति । किञ्च हिमालये श्रीमत्केदारनाथामरनाथगर्भालयस्थशिलालेखावथ नेपाले श्रीमत्पशुपतिनाथमन्दिरान्तर्वर्ती स चासौ मण्डलाधीशपरम्परापरिरक्षितलेखविशेषतात्पर्य्यसहभावी समं खलु लेखविभेदेन केरलदेशाधीशकुलशेखरमहाराजकृतनिर्णयैनैकात्म्यं प्रतिपद्यमाना यथोक्तमेवावतारसमयं भगवतामवगाहयन्त्यतिविशदम् । दिग्विजयप्रसङ्गमुदाहरन्तः सौत्रान्तिकनिबन्धा अप्यमुमर्थं तटस्थतया द्रढयन्त्येवासमन्तादिति स्थितम् ।

अथ सुधन्वाद्यवनीश्वरसहायकसम्पन्ना एव वितेनिरे

२० दिग्विजयो भगवतां सम्राट्पुरोगमानां साहाय्यपरायत्तो नासीदपि त्वात्मनः सर्वैश्वर्यसत्तयैव हेलया सम्पन्न इत्यभ्युदितार्थः ।

भगवन्तो दिग्विजयमित्यविचारकसम्प्रलापाः प्रगल्भन्ते ! प्रमाणगणास्तानेतान्न सहन्ते । स्वप्रकाशस्वरूपसत्तयैव भगवद्भिर्महेश्वरैकसार्वज्ञावतरणैः कृतानां तावद्दिग्विजयादिकृत्यानामनितरसाहाय्यसमालम्बनयोगित्वात् । अत एव सुधन्वादयोऽपि भीता यत्र शस्त्रास्त्रधार्य्यसंख्यबौद्धादिभ्यो यदा यदा तदा खलु तानेतान्मालनयनकटाक्ष-



वीक्षणबलाद्भस्मसाच्चक्रिरे भगवन्त इत्युदाहरणैर्भूयोभिर्दिग्विजयस्यैर्निश्चीयते । भगवान्पद्मपादादिरुग्रभैरवादिदानवजनं हन्त नृसिंहादिविग्रहेणात्मेच्छयैव सञ्जवानेति स्पष्टं तत्रैव । भीत्या खलु भगवतामादित एव पलायितवन्तो बौद्धादिसङ्घा हिमाचलादिप्रान्तभूमिकास्वथ तिब्बतचीनजापानब्रह्मदेशसिंहलद्वीपेषु मृतका एव न्यवसन् । द्वीपे कस्मिन्नपि स्वाभिप्रेतसगुणनिर्गुणत्वाभ्यामन्तरा भगवद्भिः प्रतिपादिताभ्यामन्यत्तत्त्वमनुवर्तमाना नासन्नेव न वा सन्ति मानवाः यतो भारतवर्षविजयविशेषप्रिषेण सप्तद्वीपाया एव वसुधाया यथायोगं तैरेतैर्देशवर्षाभ्यन्तर एवेयसत्त्वया निरशेषं सुशिक्षितत्वात् ।

ननु भारतभूम्यामेव तत्रापि वर्णाश्रमाणां नूनं दिग्वि-

२१ सकललोकलौकिकालौकिकव्यवहारसमुद्धारस्य भगवतामभ्यर्हिततया दिग्विजयोऽयं सार्वदेशिक इतिसोदाहरणमुपवर्णनम् ।

जयप्रवृत्तेः प्रतीततया कान्वत्र प्रसक्तिरशेषवसुमत्याः । नैष दोषः । भूलोकनाकायमानभारतधरित्र्याश्च धर्मतन्त्रमूर्धन्यवेदार्थोऽवलम्बिवर्णाश्रमाणां समुद्धरणमहोदयस्यावर्णाश्रमप्रक्रियासमुद्धारक्रियासामान्यं प्रत्युपलक्षकत्वात् । न ह्यादित्यो नियतनिवेशविनिर्विश्येव सन् ब्रह्माण्डपुण्डरीकं न विकासयितुं शक्नुयादिति मतिर्भवत्यभ्रान्ता कस्यचित् । असाधारणस्य हि महिम्नः साधारणोदाहरणवस्त्वसम्पृक्तत्वात् । एवञ्च नोदीरितशङ्काकलङ्काऽवकाशः । इच्छां हन्तान्यादृशीमास्थाय वा योगेन केन चित्पादं वामं नारायणस्याखस्थानप्रदेशविशेषसन्निवेशशालिनं गयायामेव प्रतिष्ठापयितुमनसो योगबलादम्बरमार्गेण जग्मुर्भगवन्तो जगन्नियन्तारः । पथ्यां तावत्समुद्धरणाय मूर्त्ति पुना राजहंसस्य बिभ्राणानां गगनतले परि-

भूमण्डलस्य पादुकादेशं प्रवेष्टुकामानां तेषां महो माहेश्वरं वि-
हाय तत्स्थानस्थादेतो योगिजना एकविंशतिर्भगवन्तं प्रार्थया-
मासुर्माहरतु पदमिती माचामत्याक्षिणुहात् किन्त्वनुगृह्णा-
त्वेव नो भूयः सन्देहविभ्रमनिरासपुरस्सरं परं ज्ञातव्यार्थनामि-
ति । दयालवस्तेषामभ्यर्थनामङ्गीकृत्य न तं पादमाहरन्नथ चतु
र्व्याहिवाप रस्तत्स्मूर्त्या तत्रैव व्योममण्डले परिभ्रमन्तो जिज्ञासिता-
नर्थान्विस्था तेभ्यः सम्यगन्वमुपादिशन् । ते चोपदिष्टाः कर्मो-
पासनाज्ञानात्मान एवासन्किल विषयाः प्रसङ्गागतञ्च किमप्य-
न्यत् । यद्यप्यमी काण्डा जिज्ञासूनामरबीभाषाकृतप्रश्नानुरूपमेव
तथैव भाषया प्रौढिं परां प्राप्तवता निरूपिताः खलु सर्वज्ञ-
तया भगवद्भिस्तथाऽपि त एते वेदोक्तैस्तैरनिरूपा एवाभूवन्नास-
मन्तात् । तत्र तु नभस्स्थलसमासीनैर्भगवद्भिः समुपदिष्टान्भूत-
लसमाश्रयाः सादरमलिखन्नेव ते योगिजनाः । ते पुनरेते निबन्धा
स्तद्योगिजनशिष्यप्रशिष्यादिपरम्परया सहस्रवत्सरपर्यन्तं प्रचा-
रमुपयाताः । तत्स्थानस्थानेवं कृतार्थीकृत्य गच्छेतं तथैव प्रत्या-
जग्मुर्भारतभूमिं पूज्यपादाः । यद्यप्यरबस्थानादयो देशा म्ले-
च्छीयतयाऽऽख्यायन्ते तथाऽपि देशेषु तेष्विदानीमिव घोराका-
रा मतप्रकारा नासन्नेव सर्वशः । प्रत्युत सारार्थसङ्ग्राहका
एवानमुक्तरीत्या तदादिदेशीयाः । तत ऊर्ध्वं कतिपय-
तन्त्रज्ञा निबन्धनमूलतत्परम्परातोऽवगत्य तत्रत्या उपासनाम्स-
र्वां प्रत्य निन्दितगतया परित्यज्य व्यवहारप्रक्रियामपि प्राच्यशो-
ऽन्यदृश्य निर्गुणवस्तुनिरूपकानेव वाक्यविभेदानत्रत्यान्प्रमाणी-
कृत्य तदादिवाक्यविशेषसङ्ग्रहात्मानं प्रवर्तयाञ्चक्रुर्निबन्धवि-
भेदम् । सोऽयं "कुरानूमजीद्" इत्यभिधीयत इति सम्प्रदा-



यविदः च प्राचां वाच संश्रूयन्ते बहुश्रुतानाम् । एवमप्युदाह-
रणशत ननु द्वीपान्तरीयानुशासनयोत्तरं श्राहयन्ति साम्प्रताये
वचो यथाश्रुतम् ।

ननु रामानुजमध्ववल्लभा अपि स्वकाले विजयितयाऽ

२०. रामानुजादयो विद्यापपोऽप्यलङ्कर्तव्यमही अपि स्वनभिज्ञजनमोहका एवासन्निति निरूपणम् ।

वगम्यन्ते लेखनबलात् । मैवं मंस्थाः । जेत
व्यानां तावद्वादिदैत्यानामशेषाणां भगवद्भिरेव
दिग्विजये भस्मीकृतत्वेन च वशीकृतत्वेन स्व-
काले जेतव्यानामभावेनैव तद्विजयवार्त्तायाः सम्भ-
वाभावात् । न च भगवन्तो वा तदधिकाराधि-
कृता वा तत्सम्प्रदायिनो वा तेषां विजययत्नविषया अभूवन्न-
वेति भ्रमितव्यम् । अष्टशतसप्तशतचतुश्शतवर्षाभ्यन्तर एवाधि-
गतजन्मनामङ्कितत्रयाणां यथोपवर्णितकालावतरणैर्भगवद्भिस्सा
कम्बन्धासम्भवात् । न च पुना रामानुजद्वेषणो भूत्वा सहस्रपद-

२१ भगवद्भिरसमवादीद्रामानुज इत्यस्य भ्रान्तत्वप्रकारः ।

नैरजवद्वादकथाया भगवन्त इति वा साम्प्रतम् ।
शेषस्य हि तेषां महेश्वरावतारराणां किङ्करावि-
कुरस्य तथाविधप्रवृत्तिप्रसक्तौ कटाक्षमात्राद-
स्त्रीभवनविपञ्जरेव दुर्निवारत्वात्तस्तुतोऽसम्भवत्वेनोक्तोत्तरत्वात् ।
भगवतां परम्परासमयात श्रीपूर्णदेशिकाः पुनः श्रीमन्माधवाना-
ख्योऽप्यप्ययदीक्षितपण्डितराजप्रभृतयो ज्ञानाढ्यास्तेभ्योऽप्यर्वाचीना
विद्वांवरा श्रीनप्यैतानात्मनिबन्धेष्वभिकृतवन्तोऽद्वैतसिद्धान्तसिद्धा-
ञ्जनमुखचपेटिका गुरुविष्वंसन मोहनिवारिणी समाह्वयैर्ग्रन्था-
स्त्रियथान्यायम् । नैते खलु भ्रान्ता भ्रान्त भान्तादयः श्रोत्रियवि-
द्वन्मान्या अभूवन् अपितु प्रतिपदं गर्हापदमेव तेषाम् । सर्वे ह्येते
गौडा वा द्रविडा अवच्छेदकावच्छेदेन भगवत्पूज्यपादनिरवधै-

दिकराक्रान्तानिष्ठागरिष्ठा भवन्ति स्वप्रणाख्या । केचिदेव तेषामिदानीन्तना जान्तादिवर्त्मानुवर्त्तिनो विलोक्यन्ते विचारविधुरास्तत्र तत्र साक्षरा अपि निरक्षरोचरत्समाचारदुर्ग्रहाः । धर्मान्तराणि देवानांप्रियाणामेव रक्षकानि तेषामपि पुनः केषाञ्चिदेव मुग्धबुद्धीनाम् । न मनागपि विद्वत्समागमवताञ्च विचारात्मनाम् । देवान्तु पुरस्तद्धर्मवार्त्तीया उद्धारगन्धस्य वा स्वाभीष्टाजननत्वात् । वर्त्मनाममीषां महाराष्ट्रमैथिलनेपालकाश्मीरादयो देशा नामापि न विजानते प्रायशः । अन्ये तु जानन्तोऽपि तावतैवालम्मतयः । ननु राजानोऽप्येतदध्वश्रद्धावन्तो विज्ञायन्ते केचित् । नैवम् । तेऽपि पूर्वजपरम्परया भगवत्पादपादाम्भोजमरन्दमाधुरीचञ्चरीका एव सन्तोऽन्तराले तत्स्वरूपस्मृतिशून्येन केन चिद्धंशोद्भवेनापि परिगृहीतरः हि वर्त्मन एतस्यानुदाहरणार्हत्वात् । अनवस्थितमतिका हि मानवाः किञ्चिन्न कुर्य्युः । वर्त्मान्येवैतानि मलवत्तररागद्वेषादिविषमविषवल्लीफलजननान्यैहिकस्नेहसौमनस्याद्यमर्याहितप्रदैः समं साम्परायिकसुखसामान्यविप्लववाहीन्येवाऽऽलक्ष्यन्ते पुरुषार्थमाहात्म्यविद्भिः प्रत्यर्थम् ।

२४ दिग्विजयलक्षणं स चासाधीश्वरस्य भगवत एव नेतरेषामिति फलितोऽर्थः ।

एष महिमा दिग्विजयस्य यत्स्वप्रभावतेजोरश्मिभिः सर्वे वादिनः पराजिता भवेयुर्धर्मामासं परित्यजेयुर्जेतुरेव धर्मं समाश्रयेयुः सम्राट्पुरोगमाः सर्वे एवान्तर्थमात्मशासनपरायत्ततया रञ्जयेयुः स्वयं हि विजयी स्वकाले स्वराड्भावमामनेत निरङ्कुशम् । एवङ्गुणविशेषणविशिष्टो हि दिग्विजयो भगवतामेवैकान्तिकतया विद्योतते स्म युगचतुष्टय्याम् । माक्तया तु राजसूयशेषभूतगण्डवर्तिनयः । नेतरः सुतरां पूर्वतरस्मिन्नभ्यासत्रसर्वार्थो विरूपे किल काले । दिग्विजयोऽयं महेश्वरस्य विष्टपानि चतुर्दशान्यप्येवं परिस्फोरयन्स्वेन महिम्ना वृश्चिकदंशसधर्मजान्तादिविजयवार्त्ता विनोदाय वा न सहते न वा विचारकवीराः कदाचित्सहन्त इत्यलं नव्यं न किञ्चित् ।



एवमत्यासमाचिन्तामत्र समापय्य कृते पुनः परामर्शी

२५ चक्रवर्तिषु परमर्षिषु चाचार्यगुणलक्ष्मीसमुद्देशः ।

परीक्षिदादीना “ भेतेभ्यः पुराभवा धनुर्धराश्चक्रवर्तिनो द्युम्नेन्द्रद्युम्नभूरिमान्धातृसगरा ” दयश्चरित्रं निजमतिमानवं वितेनिरे परं चराचररक्षादीक्षापराः स्वस्वकाले । किं पुनरभ्युदिताशेषविशेषसाचिव्यवदध्यात्मविद्याविलासनृत्यद्भूमयो जनकजानकीजान्यजातशत्रुप्रावाहणप्रमुखाश्चात्मशास्त्राभिः सहैव प्रजाभीरामणीयकतरशीलशालिन आसाञ्चक्रिरे । परमर्षयश्चाचार्यसत्तमास्तावद्धर्मतन्त्रसमुन्नितप्रचाररञ्जितचरित्रा आसन्नेवाऽधिकारिकमानुषस्तोमसमुद्धारसमुपात्तजन्मानः शर्माणोऽपि विरूपवर्माणः कृपापाङ्गानामापङ्क्तिलं पात्रमगायन्त कन्दर्पदर्पापहन्तुरासमन्तान्नेदारश्च पुमर्थप्रस्थानप्रकाण्डाचरणप्रचारणानां साटोपम् ।

२६ कालविकोपाकलिततुरुष्कज्वरेशोपप्रबोहेशः ।

अपर्यन्तेऽपि हि काले व्यवहारधर्मतन्त्रयोः समर्थितशेषवैशारद्यानाममीषां परम्परापरिभ्रासजनजातमत्यादिदौर्बल्यबाहुल्यमालक्ष्य दुर्गमतमामपि भारतसर्वसहां पदचारैरात्मीयैरुपमर्दयन्तो विद्याः कला आचारानर्थतत्त्वं तदुपायान्तत्संस्थास्तदवासिं च न्यक्कुर्वाणा निगृह्य तत्सन्ताननभूतानात्मनो मतविषमव्यापारपराहतान्विधाय तद्द्वारा समस्तानेव वर्णाश्रमिणो वैदिकं चाध्वानं सकलाध्वनां परमार्थपरावधिभूतं सत्तान्तावद्राष्ट्रीयामाभिव्याप्य व्यापादयामा-

सु: श्रेयःपदमभिकामयमाना अपि यतमानधाधीशा उत्तरोत्तराः प्रायशः । सकलार्थग्रन्थजालप्रज्वालनदेवालयादिसञ्छेदनपातिवृत्त्याद्यपहरणनिर्हेतुकलोकावहेलनक्रौर्यतापादकवृत्तिजाताभिवर्द्धनाभ्यर्हितसामाजिकसमाधानवञ्चनादयः परिणामवैषम्यनिर्धारणाः स्वेषां वा परेषां प्रत्यवस्कन्दनशालिनो विकृतप्रयत्ना एष्वेवावात्सुरतितरामिति जागर्त्येवानुमानमपरिचितानां वा भूयोभूयः कार्यलिङ्गकम् । न खल्वेतत्प्रत्यक्षोपजीव्यसंस्थानसम्भाररोचिष्णु वाऽलङ्किलाऽन्यथयितुं सम्भावनासहस्रमौहिकानां मूनं वास्तवमपह्नुवानानाम् । तेऽपि चेदाकृतदत्तावधाना: स्युर्विविक्तमत्या तदा अपगतशेमुषीमषीमालिन्यास्तात्त्विकमेव भावं युगपत्पर्यायेण वा प्रतिपत्तुं प्रभवेयुरेव ।

नन्वास्तान्तावदाक्षिप्तदूषणपटलीप्रवृत्तिप्रकर्षो यथोपन्यस्त-

२७ नैत एव दूषणार्हा इति प्रसक्तावपि सत्याद्विनष्टं वस्त्वनिष्टदमेवेति वस्तुनिरूपणम् ।

भूभुजां वृन्देषु सत्यानृते युगलीभूयाभिजायमानन्तु व्यवहारसर्वस्वमदोषासम्पृक्तं सत्ताद्विशेषसमायत्तकरणग्रामाः कथङ्कारं न प्रमाद्ये ततो हन्त विद्यावन्तो धरावन्तो द्रविणवन्तो वा कतमस्मिन्नपि काले "प्रमादो मानुषो भाव" इति कृष्णद्वैपायनस्मरणाऽनुगृहीतानपनोदनीयानवधानतापरिष्कृतात्मत्वपर्यवसानलक्षणा इति चेन्मास्मैवं भाषिष्ठाः । याथात्म्यस्य हि तस्यान्यथैव सम्प्रतिष्ठितत्वे विषयस्यामुष्य क्षोदक्षमत्वात् । को नु खल्वयं व्यवहारोऽभिमत आयुष्मतः किं केवलकैवल्यपदावाप्तिपर्यावेदन आहोस्विद्व्यामिश्रीभूतकार्यप्रवाहनिर्वाहैकजन्मा उत सत्यानृतयोरापातप्रतीत्यापादकसमाचारोऽन्यो वा यदृच्छाविभेदविग्रहवानिति । न तावत्तुरीयः । तस्य यादृच्छिकीषु क्रियासु



सङ्कल्पप्रवृत्तिविषमर्यादानन्तर्गतास्वेव स्वरूपाऽनुरूपफलसङ्ग्राहिकासु सम्प्रत्ययात् । नैतावता प्रेक्षावत्प्रवृत्तिप्रयोजकहेतुहेतुमद्भावः सफलीभवेदिह समृद्धात्मा । न तृतीयः । न ह्यसावापातप्रतिपत्तिभ्रममात्रप्रसवित्री कार्याय वा कस्मैचिद्यथावत्प्रभवेत् । अन्यथा निरूढप्रतिपत्त्यर्थं प्रयतमानानामनावश्यकी स्यात्प्रवृत्तिः सम्यग्रूपा वा । तादृशप्रत्ययनिर्वाहकास्तु समाचाराः खलो व्याप्यतावच्छेदकधर्मावच्छिन्नकृत्याविभेदं प्रति हेतुभावमुपयाता अपि व्यापकतावच्छेदकधर्मावच्छिन्नान्प्रति तु तानतद्भावमधिगच्छन्तो वैकल्यायैवावकल्पेरन्नजस्रम् । आपातप्रतीतिः सत्यानृतयोः समाना वा स्याद्विषमा वेति विचिकित्सायामेकत्रैकतरस्य न्यौन्यमाधिक्यं चान्यत्र साम्यं पुनस्ततोऽन्यत्र कृतास्पदमिति वदन्ति हि वस्तुविदो निर्विचिकित्सम् । एवं च सत्यत्वानृतत्वाभ्यां नाम धर्माभ्यां नीयमानो हि धर्मी परस्परप्रत्यनीकभावोपाहितदशाविशेषशीलितया न स्वभावभावोपलालितप्रक्रियामाधत्ते । तथा च गरलांशसमाश्लिष्टक्षीरराशिरिव धर्मी कश्चित्तथ्यामभिभूयमानो न विशुद्धात्मा संसिद्ध्येत् । विशुद्धधर्माणस्तु विशिष्यनिरूप्यमाणा अशुद्धेभ्यः पुनस्तेभ्यो विशिष्यन्ते व्यवहरणवेलायाम् । इतरथा निराश्रयावमू शब्दौ न व्यवह्रियेयातां लोकतः शास्त्रतो वा व्यवह्रियेते तु ताभ्यां प्रत्यर्थमित्यवगतिरेतयोरितरेतरविरोधिनी न भ्रामिका कथञ्चित् । नानेनानृतं सत्यमिव विहितं मन्यताम् न वा सत्यात्प्रमदनं कस्यचित् । यथा चाम्नायते " सत्यं वद । सत्यान्न प्रमदितव्यम् । सत्यमिति सत्यवचा राथीतरः । सत्येन वायुरावाति । सत्येनादित्यो रोचते दिवि । सत्यं वाचः प्रतिष्ठा । तस्मात्सत्यं परमं वदन्ति । त-

स्मान्नानृतं वदेदि " ति तैत्तिरीयके । " अश्वमेधसहस्रं च सत्यं च तुलया धृतम् । अश्वमेधसहस्राच्च सत्यमेकं विशिष्यत" इति स्मर्यते च भारतादौ । चाचः खल्वेता अपारमार्थिकादनृताद्पसृत्य पारमार्थिकस्यैव सत्यस्य प्रतिपत्तिरनवरतमनुज्ञाता भवति प्रमाणभूतानां तु श्रेयोऽभिवाञ्छिनाम् ।

ननु " गुर्वर्थे ब्राह्मणार्थे चे " त्यादिना गुर्वादिविषय आदरभरेणानृतं वक्तव्यतयोपदिशद्वचनशतमुन्मथ्येत । नैष दोषः । तस्मादपि सत्यस्यैव प्रतिपत्तेरभ्यर्हितत्वात् । इतरथा सकृदप्यनृतप्रसक्तौ मुहुर्मुहुस्तथाविधं प्रसङ्गमुद्वीक्षमाण आवर्तयन्नेवानृतमनृती स्याज्जगत्यामिति । सत्यस्यैवोत्सादयितुः कुतस्त्यं माहात्म्यं धार्मिकतायाः । वाचान्तूदीरितदेशीयार्थवादरूपाणां नानृतं वदेदित्यादौ लिङादिना सन्नियतविध्यर्थसमाश्रयाणामेकवाक्यतापन्नता न्याय्यैव सर्वथा वचनैः समं वैधैः । तथा चैवं महिमैव गुर्वादेरुदितवाक्यादाख्यायते न तु जातु तन्निमित्तेनाऽनृतं वर्तयेदिति । एतदेवाभिप्रेत्य " सर्वत्राऽप्रतिहतगुरुवाक्यः पातकाद्भ्यन्ते " ति सस्मार भगवान् बौधायनः । वस्तुतस्तु गर्भितागर्भितगभीरबोध्यतावत्सत्यताया अभाव एवानृतम् । नास्ति तु स्वातन्त्र्येणानृतं नाम वस्तु कदाचिदपि । असतः सत्त्वेन प्रतीयमानानर्हत्वात् । सता ह्यभिसम्बन्धो विधीयते नासता । न हि तावद्भावप्रतियोगिनो ह्यभावेन शक्यते कश्चिदभिसम्बन्धुम् । जातिगुणक्रियाणामेव तस्याऽस्तित्वानिरूपिकाणां तत्राभावात्मन्यभावात् । न च " पदार्थौ द्विविधो भावोऽभावश्चे " ति न्यायविदां समयः खस्याप्यस्तित्वमवगाहयन् कथं तवामुमभ्यु-

२८ सदा सत्यमेवानुष्ठातव्यं नानृतं कदाचिदपि तस्यावस्तुत्वादपुरुषार्थत्वाच्चेति निरूपणम् ।



पेयादुपन्यासमिति प्रत्यवस्थातव्यम् । तस्य हि व्यवहारकालीनजातिगुणक्रियाणां नामास्तित्वपर्यायभूतानामात्यन्तिकाभावबोधकरितसम्भावनामात्रं प्रति विवक्षुत्वादुक्तगत्या । एवम्भूतानृतयोः स्वरूपपरिचिन्तयाऽवस्तु सदेवाऽनृतं वस्तुभूतेन सत्येन " सत्यं जयति नानृतमि " ति गौतमीयस्मरणानुगृहीतेन च पराभूयमानमथ निरात्मकं प्रतिपद्यामहे । इत्थं च निरात्मकस्याऽनृतस्यापातप्रतीत्यापादकसमाचारगोचरविकल्पो नावकाशं लभत इति स्थितम् । अत एव न द्वितीयः । कार्यप्रवाहे व्यामिश्रीभवनस्य स्वरूपानुरूपस्यापाकरणादिगोचरशङ्काविशेषानास्पदत्वेऽपि विविक्तप्रत्ययविभेदर्शीविषये तु तस्मिंस्तन्निरासार्हमानसानुयोगस्य वस्तुसमवायानयोगैकयोग्यत्वात् । कल्पस्त्वादिमो मन्यमानोऽपि ब्रह्मण्येष्वेव कैवल्यपदावाप्तिसंवाञ्छिष्वनुगततया नेतरेषामुदाहरणविषयतामश्नुते । इतरे त्वर्वाचीनविषयव्रातविषक्तमानसाः स्वानुगतं किल व्यवहारमुपाददत इति द्वयोरेतयोरितरेतरविलक्षणः पन्थाः स्वे स्वे कर्मणि पर्यवस्यति । व्यवहारस्य स्वहेतुकधीविशेषविषयसन्नियतत्वात् । स चासावात्मविदां व्यवहारो निर्मृष्टाशेषविप्लवपतङ्ग्रामो " निमिषार्द्धं न तिष्ठन्ति वृत्तिं ब्रह्ममयीं विना । यथा तिष्ठन्ति ब्रह्माद्याः सनकाद्याः शुकादयः । यद्यत्पश्यति चक्षुर्भ्यां तत्तदात्मेति भावयेत् । यद्यच्छृणोति कर्णाभ्यां तत्तदात्मेति भावयेदि " ति श्रुतिवर्णितकृतिमत्सामञ्जस्यमानोऽनृतप्रक्रियायनारोहन्नैदेशिक एव तस्याः संसिध्यति । प्रकरणमप्यनृतस्य स्वभावपर्यालोचनया सत्यादस्ति दवीयः ।

२९ सत्यानृतयोर्लक्षणे पुनस्तयोः स्वरूपविवेचनम् ।

सत्यं च सर्वकालं दृष्टश्रुतविपर्ययप्रतीत्युपासेहानहेतुविशिष्टस्ववृत्तिव्यक्ताऽव्यक्तस्वरूपस-

माधागाधीनः प्रतिपत्तिविशेषः । अनृतं त्वनुद्भेवानव-
स्थितप्रकाराकारिव्यूहवाहनारूढः परिणामवैकल्याकलितविश्रु-
तिचरो विकारविशेषः । सत्येवमुभयोरालोकतमसोरिव समु-
दाचरत्स्वभावबाहित्वे वस्तुगत्या सत्याऽनृतयोर्युगलीभवनमे-
वाऽनुभववाह्यं सद्व्यवहारतन्त्रे दूषणनिरूपणाय नालं कदाचित् ।
निर्दोषव्यवहारस्यैव समूलोन्मूलप्रवृत्त्यापत्तेः । दोषविशेषवशंव-
दकरणकलापा इवानृतिनो यमनियमैर्न्नृतवन्तोऽपि यशोविशेषशा-
लिनो भूयो भूयः सङ्कीयमानाः स्थेम्ने जगतां सम्भवन्तो महा-
भागाः सदर्थेभ्यो न प्रामाद्यन्त नापि विद्याधरा द्रविणाद्रिभिरपा-
त्राणामनुपकारकारिभिरीषद्वा मुदितात्मानोऽजायन्त कुहस्वित् ।
प्रत्युत विद्यादीनाममलगुणौघैर्हारीकृतशोभनपद्याकम्बुग्रीवा अरा-
जन्तैवात्युच्चैः । इतरथा महाभागत्वादेर्धर्मस्य तेषु प्रतीततरस्य
व्याकोप एवाऽपतेत् । वैकल्यादपावृत्य साकल्यैकसमर्जनाय य-
तमानाः सन्मार्गिणो महत्तरसम्भारभूतविद्याधरा द्रविणान्यादरभरै-
रुपाददाना व्याहन्येरँश्च तैरेतैराराादेव प्रतिपत्तारः । निःशेषा
एवैहिकाऽऽमुष्मिकफलप्रसवप्रत्ययोश्चीता किल सामग्री समिच्छ-
द्भिरप्यभ्युदयनिःश्रेयसे स्यादेव संत्याज्या । न चेष्टापत्तिः ।
इष्टानिष्टयोः स्वरूपानभिज्ञस्यैष्टिर्वा अनिष्टिरिहाकिञ्चित्करा य-
तः । नच “ प्रमादोमानुषोभाव ” इति स्मृतिर्द्वैपायनीया प्रमादमे-
व तात्त्विकभावेतरभावानुरक्तिप्रसक्तिलक्षणमनुष्ठेयतयाऽभिधत्त इ-
ति साम्प्रतम् । यथोक्तलक्षणप्रमादमात्रप्रहाणकर्मण्यमुष्या निर्भर-
भरत्वात् । अन्यथा कर्तव्यसामान्यनिर्णेजकनैसर्गिकवस्तुनो बता-
मुना ग्राहेणेव ग्रहीयमाणा भक्ष्यभावायैवास्योपयुज्येरन्मनुजा ह-
न्तानवशेषाः । तस्मात्प्रमादजलधेर्मर्त्यानाममीषामुद्दिधीर्षवो भगव-



न्तो मन्वत्रिमैत्रावरुणिव्यासादयो न्यरूपयन्नमुं मत्या तयाऽनुवा-
दिन्येति कृतमकृतिचिन्तया । एवं च उचिताऽनुचितविचार-
परिवारवञ्चितचेतसां नाम प्रमादिपदाभिधेयभूतानां चेष्टा हन्त
नानाविधा अमादेयाः परं शीलितप्रज्ञानामिति स्थितम् ।

३० गतिं कुटिलां वर्त्तयितुं मानोप-न्यासेऽपि तत्त्व-रूपविवेचनेन त-स्याः परिमार्जन-म्।

ननु “ सत्यानृते मिथुनीकृत्याहमिदं ममेदमिति नैस-
र्गिकोऽयं लोकव्यवहार ” इत्यध्यासभाष्य-
वचनव्यक्त्या व्यवहारमात्रस्य सत्यानृतात्मत्वे
कथमेवमेतदपोहसीति चेन्नाहमपोहामि । किं
तर्हि “ तत्सत्यं स आत्मा । सत्यं ब्रह्मेत्या-
चक्षत” इत्येवमाद्याभिः श्रुतिभिरपास्तसमस्तोपाधिसम्बन्धस्य ब्र-
ह्मण एव पारमार्थिकतायास्ततोऽतिरिक्तत्रैकालिककार्याणां क-
लापस्य केवलव्यावहारिकतायाश्चावबोधने तात्पर्यं तस्या आवे-
दयामि—न तु जातु तन्मिषेण त्वदुत्प्रेक्षां तत्राय संयोजयामि
अपि तु वियोजयाम्येव परिशुद्धव्यवहारप्रतीत्यर्थं स्थेम्ने परं
सन्मार्गाणामित्यवेहि वारं वारम् । इतरथा वद तावत्त्वमनृतं स-
त्यमिव प्रसाधयमानस्तद्विवर्तभूतानां नाम दोषाणां पृथक्सत्यस्य
विवर्तभूतेभ्यः साधर्म्यवैधर्म्ये यथान्यायम् । न शक्नोष्येव व-
दितुं साधर्म्यमभिलापकप्रतीत्योरभिलाप्यप्रतीतिवैरूप्यनिरूपक-
त्वात् । वैधर्म्यं चेदावेदयितुमीहसे तदा प्रमिणोष्येवावेदनं मदी-
यमिति न मे कश्चिद्विवादः । किं तव तावता लब्धमिति चेत्किं
तव तावता छिन्नम् । न मे किञ्चिच्छिद्यत इति चेदप्रकृते त्वे-
वमर्थे केन तुभ्यमभ्यधायीति जानीहि नः सौहार्दमेवासम-
न्तात् ।

अथापि भवतु नाम दौरात्म्यवैविध्यकथा तावत्तुरुष्कन-

रेश्वराणां नो भूतपूर्वाणां कथाविशासामासादितनिःसीमसाम्राज्यसमृद्धाः साम्प्रतिका एवाङ्गमहाराजास्तेषां समनन्तराधिकाराधिकृतदीव्यत्पदारोहा नासते किन्तु ततो व्याप्यप्रचारयन्तो निर्वर्णितसमाचारसमाहेषु प्रकारान्तरोपनीतसाध्यार्थविशेषकेष्वसु बाह्यैकसिताकाररञ्जितेषु कथमपीति । अत्रैवं विचिकित्स्यते किमाकुलानां समाचारा धर्मतन्त्रपरिष्वक्तात्मान उद्दिश्यन्त उत राष्ट्रीयसामयिकविचारणाः समाश्रस्ता इति—तत्राप्येतयोः कतरस्य समाचारा भूतपूर्वमानवेशप्रचाराव्याप्त्या विज्ञायन्त इति च । न तावत्पूर्वः । न ह्यसौ धर्मतन्त्रसम्पृक्तात्मा नाम समाचारधारा स्वया वस्तुगत्या संसर्गविधुरैर्महाराजैरेतैरसाधारणरीत्याऽन्वीयते सुतराम् । व्यावहारिकक्रियामात्रसमवायित्वात्प्रतिज्ञातात्मनो विशेषतोऽमीषाम् । न चामी व्याप्यव्यापकभेदाभिप्रायाद्विवाकादिपदारूढा आकुला एव सन्तो यथोक्तार्थप्रस्थानेषु सहसा परिस्पन्दन्तीति चोदितव्यम् । भारतवर्षीयैरेव शीलिताशीलितमतिभिस्तया तया गत्योपस्थापितान्येव प्रस्थानानि धर्मतन्त्रसमवायीनि कोटौ तावद्व्यावहारिक्यां समावेश्य विचारितवताञ्च निर्णीतवतामाकुलानां स्वतोऽदोषित्वात् । न चापि तथाविधैः प्रेर्यमाणा निजनियमाच्च प्रच्यवेयुर्न्यायाध्यक्षा इति साम्प्रतम् । स्मृत्या हि "नोत्पादयेत्स्वयं कार्यं राजा वाऽप्यस्य पूरुषः । न च प्रापितमन्येन ग्रसेतार्थं कथञ्चने"ति मनोः सकलसार्वभौममूर्द्धन्यस्य राजराजपुरुषयोः स्वत एव कार्यसामान्योत्पादनप्रयुक्त्यासेधपूर्वकमन्योत्थापितकार्यतन्त्रसमुपेक्षाभावप्रत्यासक्तमवबोधयन्त्या तावत्त एते अनुगृहीता यतः । यदि चेदेते स्वावेशवशेनैव प्रजाः परं निगृह्य धर्मतन्त्रव्यवहारानुपाद[illegible]मेऽप्यतिक्रमम-



नुवर्तमाना मर्यादास्तत्सम्बन्धिनीश्चोच्छिन्द्युस्तदा स्वप्रतिज्ञावहिर्भाव्यसम्बद्धप्रवृत्तिमत्तया दूषणभाजनं भवेयुरेव गुरो निजनेतृधुर्याणाम् । अद्यावधि तु स्वत एवामी पुरस्कर्तृप्रोत्साहसहस्रमृते न प्रवृत्ताः किलोदीरितेष्वर्थेषु न वा तान्यैमनस्यमाचरन्तो दूषयाम्बभूवुरिति प्रचलितव्यावहारिकावतरणैरनुजानीमहे सम्मतिमयोनुशासनपुरःसरैर्यथाप्रसङ्गम् । न खल्वमी क्रीस्टवर्त्मापिमातिवाताहताः श्रौतवर्त्मसुमतिसम्माननीययोजनावत्सूदासीनभावमवलम्बमाना नादरभावं भजन्त इत्युपपद्यते । आदरभावप्रयोगयोग्यासु हि क्रियासु सर्वसम्मत्या नूनं ज्ञाप्यमानास्वादरःतावज्जृम्भिताया एव स्वस्त्ययनविशेषवितरणानुकूलव्यवस्थाया अर्थिभिर्लब्धस्वाङ्गम्यमानत्वाल्लभ्यमानत्वाच्च । न हि समीहा स्वोचितसामग्रीमृते कचिदपि कृतकृत्या समालोक्यते । नो खल्वीहावन्तः सम्पन्नसामग्रीका एवोपजायन्त इति शक्यते नियन्तुम् । सामग्रीविकलतराणामपीहासमुदयदर्शनात् । वन्ध्यायाः सुतासुतसमुदयदर्शनलालसावत् ।

३१ पुनरपि रूपान्तरे आपन्नराष्ट्रनिवारणमाकुलानां न्यायप्रदानधुरन्धरत्वञ्च ।

भाव्युत्तरः कल्पः । राष्ट्रीयसामयिकविचारणाः खलु स्वान्तर्वर्त्युच्चावचमध्यमप्रसङ्गभेदं तावत्परामृशतां प्रकृतिमतिवैरूप्यौपयिकेतिकर्तव्यताविधाविभेदसम्बाधिनमशेषकालिकानामेव राष्ट्रेश्वराणां प्रत्यर्थं भिद्यमाना गत्या पुनस्तया तया नीयमानाः कतिचिद्भिर्भाव्यमाना विभाव्यमानाश्च कैश्चिच्च काले किल कलिताकलनैरनिवार्यमाणा अपक्रान्ते तस्मिन्नालक्ष्यमाना एकान्ते वा सुमित्रेषु पर्युच्यमाना अधिसदः सारिष्ठतया प्रस्तूयमानाश्च स्वभावभावाच्च मुच्यन्त इति तासां वा

लोकव्यवहारपालनावतामाभवन्ति चापल्यसञ्चाराः । नो खलु व्यवहारगतयो गतार्थाश्चो विभ्रमांश्च वारयोषितामनुकुर्वाणाः प्रतिश्रुत्यप्रत्युपचयापचयवीथीविहारव्यग्रचात्मानो व्यवहारं तु स्वातन्त्र्येण दूष्यभावमापद्यते । आहङ्कारिकैककृता एव तु ताः प्रत्यासत्त्या अहङ्कारस्याभिनिष्पन्ना भावन्तमेतमुपाददत इति वदिता कश्चिच्चापराध्यति तासाम् । एवं तर्हि कृतविपरीतकृत्यास्तु कार्यचारिणः कृत्यैकसङ्गाभिमानेनदारुण्यसञ्चारणाः स्वयं तावत्सचेतारो भवन्तोऽपि तेभ्यो मोक्तुमिच्छन्तीति साहसमेवैषामासमन्तादिति सूत्रकम् । एवं च कल्पद्वये विकल्पायिते तयोः कतरस्य समाचारः भूतपूर्वमन्येन प्रचाराव्याप्त्या विज्ञायन्त इति चिरकालान्तरं न प्राप्नोति । राजन्यवर्गाणां तद्व्यवस्थाप्रसङ्गेऽपि उपसर्जनीभूतावान्तरधोरणीतामनङ्गमत्वेऽपि प्रधानभूते तावद्राष्ट्रव्यवस्थानलक्षणे वस्तुन्यैकमत्यसम्भावितासन्दिग्धाविपर्यस्तेऽविवादमुपपद्येः । तद्यथा—गमनदमनन्यं प्रति गन्तॄणां वा गमनस्य प्रकाराणामितरेतरविरूपप्रकृतिकत्वेऽपि स्वलक्षणस्य देशस्य सम्प्राप्तिस्त्वास्ति तेषामविशेष एव । स्तुमुचितसमयाऽवच्छेदेन तु गृहं तिरोभवास्ते न समाचाराः कश्चिद्भाष्यां व्यापिकाञ्च काचित्प्रचारागतिं प्रोत्साहयन्तः समताञ्च तां संशीलयन्तो निर्वर्त्यस्वरूपसन्धानाधीनविग्रहविभेदाः समुपजायन्त इत्ययमप्यस्वार्थ्येव विकल्पविशेषः । पर्यालोचनायान्तु राजसु नाट्यसितामारस्यासायकवाक्यन्यस्तेरूपयोगो नालं दूषणायाऽपि नु भूषणायैव नाट्यो निजस्यानुकीकरणेन व्यवहारवेलायां प्रजाभिः सार्कं तादृशार्थे । "वध्येष्वपि न भ्रकुटीमाचरेत् । स्मितपूर्वाभिभाषी स्या"दित्यादिभ्यो विश्वा-



स्मृतिवचनेभ्यः सिताकारतादेर्यथाप्रसङ्गं राज्ञो विहिततत्त्वात् । न च विहितं प्रस्मर्तव्यं कदाचित् । श्रेयोविशेषाविवातुकत्वात् । इत्थं चेमां विषमपि समानतया वस्त्वानुरूपप्रभूणामस्त्येव स्वादीयः साधीयश्च व्यतिक्रान्ततुरुष्करानानां समाचारेभ्यः श्रेयोमार्गपराङ्मुखेभ्यश्च पारुष्यतारुण्यसङ्कारकेभ्य इत्युपपद्यते । समस्तं त्वं हि कृत्यैः प्रभुप्रभवानाममीषां सर्वजनीनसद्व्यवस्थापनासंयोजकाश्रयायित्वात् ।

नतु महता संरम्भेण त्वया दूषणभूषणं प्रपञ्चव्यवहारप्रसङ्गमवतार्य ज्योतिश्चक्रे गुणदोषव्यामिश्रीभूतव्यवस्था चाभाणि सम्प्रति तु विपर्ययेण तस्मादेवं कथङ्कारं प्रब्रवीषि । नायं दोषः । तत्र हि तीर्थाघलौकिकप्रस्थानविभेदसाम्यायोर्द्धारप्रासङ्गिकानेकविषयविशेषप्रवाहान्तःपातितयैषामपि व्यावहारिकविषयाणामनुगतसाधकबाधकसामग्रीसामान्यसंश्लेषितानां निरूपणस्याप्रासङ्गिकस्य पुनस्तेषामभ्युदयसीमा-

२१ प्रसङ्गात् कृतस्य ज्योतिश्चक्रे दूषणकथनाऽऽत्र कर्तुं नाऽत्र तेषां दूषणपरता अपि तु गुणातिशयमाहात्म्यवर्णनलक्षणनिरूपणाभिप्रायप्रवणतेति विशदीकरणम् ।

तीतसम्भारसाधनौपयिकस्य वाचो युक्तिभिरन्यादृशीभिः प्रतीतस्य शुल्कस्यापि निरूपणेन किलानेन निश्चलिताकूतसमालोचनयैकात्म्यमेवाभिप्रेतं यतः । तत्रापि व्यवस्त्युद्देशेन कृतं भूयःकृत्यानां दूषणं वा भूषणं नासूयां वा सौमनस्यं पुरस्कृत्य प्रायुङ्क्त ग्रन्थकृत्स एष इति चतुरस्रम् । ताभ्यामप्यसूयासौमनस्याभ्यामसम्पृक्तत्वादेव सर्वशो निबन्धस्य तस्यास्तु । ये च तत्र दूष्यकोटितामारोहन्तः प्रतीयन्ते विषयविशेषास्ते तावदानुवादकसरणिनिविष्टा नैव प्रध्नीयुर्निबन्धकारमुदासीनमानसं व-

स्तुपुत्त्वा । तत्तद्विषयगतनर्तनसामञ्जस्यासामञ्जस्यगोचरमति-
विभ्रमा हि मानवानामुदाहृततराः सन्तो नेतारस्त एव नेषां
कल्पनया भवन्ति भवितरे सुतरां विचक्षणीयाः । प्रणेत्रादयः
प्रणयनादिमात्रनिमित्तभूतत्वात्तदादीनाम् । न चैव प्रणयनादि-
कं विचार्यविषयं सद्विचारेण दूषणात्मना निर्वर्तमानसान्निध्यकी-
कुर्यादमोघमिति वाच्यम् । क्वचिदेतन्मनोवैकल्ये हेतुरिव तत्सा-
कल्ये ऽपि हेतुतरः समनुभूयते यस्मात् । उभयोरप्येतयोरवै-
चक्षण्यगोचरतारतम्यचिन्तायां विचारकाभतले साकल्यसम्पत्तिः
सावकाशा सती निर्विचाराणां चेतोविभ्रमन्तराऽप्येतेन मलिनीकु-
र्यादन्यदन्यद्वेति तु किमु वदितव्यं चेष्टितं ननु विचारोज्झित-
मितानाम् । नो खलूदासीननिन्दकास्तदर्थमाङ्गल्यविघटका
इत्युपपद्यते । निन्दान्यायेन स्तुत्यस्यैव विवेगभूतस्य तस्मा-
दनियतलतः सम्पिपादयिषितत्वात् । न हि त्वचमोषध्यादीनां
प्रायशोऽम्लादेशीयां तत्र तत्राऽनुपादद‍न्तत्वमप्यन्तर्वर्ति ता-
सां नोपादत्ते वस्तुवित् । न हि धूमरेखामक्ष्णोर्विक्षेपजननीन्ता-
वज्जिह्वासम्भोज्यमपि पाकफलात्मानं परिजिहीर्षति बुभुत्सवान् ।
न हि शासितृवाचो वैकल्यकारिण्यः क्वचिदाकर्णयता शिष्येण
श्रेयोऽभिवाञ्छी हि शासिता ने मातापितृसहस्रवदभिमन्यते सु-
मतिमता । तथा च निन्दामजानन्नापातप्रतीतिसाक्षिणीं तत्परि-
णामभूतां विश्वजनीनवात्सल्यसम्पादिनीं हन्त स्तुतिमेव विजानी-
याद्विष्णुविषणः । अनेकत्र निन्दनकलनाकलिताभासाः कि-
ल ज्योतिश्चक्रे प्रस्फोरणायैवाऽन्यस्येनोदीरितन्यायेभ्यः स्तु-
तिविषयविषयाणामर्षणीयाया परिणामप्रतिपत्तये चावकल्प्यन्ताम् ।
एतावता राष्ट्रराष्ट्राधिपतत्पुरुषतत्कृत्यानां निन्दनं तावन्न नि-



न्दनम् । अपि तु निन्दनावभासो वस्तुतस्तु नूनं दूषणा व्या-
वहारिक्या साम्राज्यपदाभिवर्धनौपयिकसकलस्वस्त्ययनार्हव्यवहा-
रनिष्पादनलक्षणस्तवनायैवोपसर्पतीत्यसौ नो भूयसी संसूचिरि-
ति कृतमभ्यन्तरायातचिन्तासन्तानसञ्चारणेन ॥

तत्त्वतस्तु आत्मप्रसूतिसंस्थानमूलीभूतपरमर्षिपरम्परापरि-

१२ उदितवर्णने स्वाभिप्रायस्य श्रावेश्ववृशस्य च निष्कृष्टस्य निरूपणम्।

प्राप्तस्वापित्राद्यवाधिविभेदप्रभिन्नप्रारब्धस्वभावा-
त्यूर्जितगुणमण्डलीस्वरूपस्मृतिशून्येष्वेव स्मा-
रकसामग्रीसहस्रेणापि तेषां प्रौढतरप्रभावापा-
दकलक्षांशस्याप्यभागिषु भारतजननीप्रमनन्तरदुरपत्येषु दूषणग-
णा अस्मास्वेवायतन्ते निरूपायम् । ते खल्वेते दोषाः स्वाश्रयेषु
सन्तो गुणा इवाऽनाश्रयेषु तावद्भूतिविभेदसंमानितेषु प्रतियोगि-
मुद्रया वा स्वनिष्ठसामान्यान्विता इवाऽऽलक्ष्यन्ते । न तु जा-
तु स्वोपमर्दकगुणालीमौक्तिकसमुल्लासवेलायामादधते निन्दास्प-
दतामीश्वरा हि प्रजानाम् । अपि तु मान्यतापदं भवन्त्येवा-
नुशासनैर्नानाविधैः । यथाऽऽहु "यद्यद्विभूतिमत्सत्त्वं श्रीमदू-
र्जितमेव वा । तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम् । नराणा-
ञ्च नराधिपम् । अष्टाभिश्च सुरेन्द्राणां मात्राभिर्निर्मितो नृपः ।
राजा सर्वस्येष्टे ब्राह्मणवर्जं साधुकारी स्यात्साधुवादी त्रय्यामा-
न्वीक्षिक्यां चाभिविनीतः शुचिर्जितेन्द्रियो गुणवत्सहायोपायस-
म्पन्नः समः प्रजासु स्याद्धितं चासां कुर्वीत तमुपर्यासीनमधस्ता
उपासीरन्नन्ये ब्राह्मणेभ्यस्ते ऽप्येनं मन्येरन्वर्णानाश्रमांश्च न्याय-
तोऽभिरक्षेत् चलतश्चैनान्स्वधर्मे स्थापयेत् धर्मस्यो ह्यंशभाग्भ-
वतीति विज्ञायत" इति स्मृतिकाराः । वचांस्यमूनीन्द्राद्यष्टदिग्दे-
वांशसञ्जातत्वेनेश्वरविभूत्याविर्भूतिमत्त्वकृतेन प्रजामाननीयत्वमा-

न्यतमब्राह्मणानामपि "लोकवेदवेदाङ्गविद्वाकोवाक्येतिहासपुराणकु-
शलत्वादिशिष्टविशिष्टलक्षणाक्रान्तब्राह्मणवर्गमादरमैर्माननीयत्व-
साधुकारित्साधुवादित्वाद्यभ्यर्हितयोग्यताविशेषवत्त्ववर्णाश्रमादिसे-
तुसंस्थानसंरक्षित्वादीन्धर्मान्राजमहीरुहसमाश्रयाँश्च प्रतिपादय-
न्ति सम्पद्यन्ते । पुनरप्येतानि द्वीपान्तरालयनरविभेदस्तो-
मकल्पनासमाकलितप्रजामात्रस्वत्वाकत्वगोचरभाष्टर्चाचसहमानानि
राजव्यक्ति कालत्रयेऽप्यनतिलङ्घनीयसमाराध्यभूमित्वेनावगाह-
यन्ति साभिप्रायम् । तन्निष्ठातो मुच्यमानांश्च मानवान्विगर्हन्ति
व्यक्ततरं "त्यजेत्पितरं राजघातकं शूद्रयाजकं वेदविप्लावक"
मित्यादिकां स्मृतिं गौतमादेरनुवर्तमानान्युच्छृङ्खलगतिमत्तानिर्भे-
दनाय मर्त्यानाम् । सैषा सरणिः सनातनी सती कदाचिदप्य-
विलोपनयोग्या जनेशजनयोरसाधारणकर्तव्यतानिर्वर्तनप्रयुक्तं श्रेयः
परं प्रोद्बोधयन्ती चोज्जृम्भते । विपर्यये तूभयोरप्यप्रसादशङ्कु-
र्भावसमुन्मीलद्भूयस्तनितैव चेतोवैकल्यात्मा समापतेत् । तदेत-
न्माप्रापदित्युभाभ्यां भवितव्यं तावन्निजनिजसमितिकर्तव्यतासा-
वधानचेतस्तयेति स्थिते तत्राद्यत्वे प्रजानाङ्किल सार्ववर्णिकानाम-
नुगतभागधेयक्षामताऽतिशयशीलितानाञ्च सर्वेश्वरप्रसादावाप्ति-
परागदनमत्यवायवतीनाञ्च स्वरूपानुरूपापलक्षणापरपर्यायभूताः
करणत्रयव्यवहृतयोऽवभासन्ते तथाहि--अत्रादौ तत्तद्राष्ट्रीयप्र-
जावर्तनसम्यक्त्वं प्रति "यतिर्गुरुर्द्विजातीनां वर्णानां ब्राह्मणो
गुरुः।पतिर्गुरुश्च नारीणां राजा राष्ट्रस्य वै गुरु" रिति भगवद्व-
सिष्ठस्मरणसमवगम्यमानराजकृतशासनसम्पद्व्यक्तेरात्यन्तिकश्रेयो-
हेतुभावभासुरतया तस्याः पुन "र्ब्राह्मणञ्च पुरो दधीत वि-
द्याभिजनवाग्रूपवयःशीलसम्पन्नं न्यायवृत्तं तपस्विनं तत्प्रसूतः



कर्माणि कुर्वीत यानि दैवोत्पातचिन्तकाः प्रब्रूयुः तान्यप्याद्रिये-
त" इत्यादिस्मृतिवचसा परमर्षेर्गौतमस्य "पुर एनं दधाती-
ति" भगवद्यास्कनिर्वचनानुगृहीतेन ब्राह्मण्यविद्यादिविशिष्टलक्षण-
लक्षितपुरुषविशेषाद्यादिष्टोपदिष्टलौकिकालौकिकक्रियाकार्त्स्न्येनि-
र्वर्तनस्य च दैनन्दिनस्याभ्यर्हिततया च पुरोहितादिप्रधान-
मानुषमयेन मन्वादिप्रवर्णे आभाषिताहोपुरुषिकासमीक्षायामनेकेषु
किल वर्णेषु संस्कारा एव ब्राह्मण्यसंस्थापका विनश्यदवस्थाव-
न्तो विशेषणावसीयन्ते । त एते "गार्भैर्होमैर्जातकर्मनामचौलो-
पनायनैः । स्वाध्यायैस्तर्पणैश्चैव विवाहस्नातकव्रतैः । महायज्ञै-
श्च यज्ञैश्च ब्राह्मीयं क्रियते तनुरि"ति स्मर्यते हि गौतममन्वादि-
भिः। सूत्रिताश्चाश्वलायनापस्तम्बबौधायनकात्यायनगोभिलादिभि-
र्भगवद्भिर्गृह्यकारैः। तैरेतैः संस्कारैर्हीनास्तन्महिमवर्हं ब्राह्मण्यं न
शक्नुयुः पर्यादर्तुम् । न वा असंस्कृताः संस्कारैकसाधनाधीनवि-
शिष्टगतिमत्तामृच्छेयुः सर्वार्थप्रसवित्रीम् । नापि प्रमर्माण्गतयो
याथातथ्येन तामुपाददानाः स्पृशेयुर्विकृतारम्भान्नाम मुदितमत्यु-
न्मीलिताम् । न चासंस्कारिणः प्रत्युत संस्कारविद्वेषिणो वा
विद्याविद्वेषिणः श्रियमतुलां वशीकुर्वाणाः संशिक्षमाणाश्च संस्का-
रिसत्तमानप्युद्वीक्षन्ते केचिज्जनेश्वरा इत्याशङ्कितव्यम्। न ह्यसौ श्रि-
योऽर्चनीयाः समवासावतिस्वच्छानामप्यात्मसात्करणे च सद्-
र्थसमूहानां भस्मसात्करणे सकृदप्यसंस्कृतमतिमत्ताप्रयोजिकोपप-
द्यते न वा वियोजिका कदाचिन्निजभावात् । इहान्यथासिद्धत्वा-
दनिशमेवास्याः । का तर्हि तत्र सामग्री हन्त प्रयोजकीभूतेति
चेदियं परिकल्प्यमाना व्यावहारिकविषयविशेषोपस्थापनपाटव-
वती सैव तद्गवेषणपराभूतान्तःकरणानां नाम निर्वाणितसंस्का-

रपराभिसन्निभपरितुन्दिलानामनन्यमानसानाञ्च सकृदेव कातवतीति वदामः । समान एव विषये विरोधोऽनवक्लृप्तो न मनाग्वा विषमे यतः ।

यद्यप्यविचारचतुराः संस्कारवदसंस्कारिणोर्वैलक्षण्यं सहसा न विजानीयुस्तथाऽपि निर्धूताधूतदुकूलयोः शोधिताशोधितधात्वोर्दर्पणकुड्यादेर्मुखावभासतदनाभासनिर्ग्राहकमृत्स्नयोः शीलिताशीलितौषध्योरीक्षणवदनीक्षणसञ्चरणयोरिवाबालगोपालं तावत्तयोरुन्नावनयोग्यताविवेकोऽस्त्येव व्यक्ततरोऽयमेतमास्थाय परीक्षिणो जनाः स्वप्रवृत्तिं कृतार्थीकुर्युः किं च सर्वोऽपि हि प्राणभृच्छाखामृगमार्जारादिः स्वतो वा परतो व्युत्पन्नस्त्वरूपवत्तामभिगन्तुमात्मवर्गानुकूलस्वभावपरिणाममुचितमार्गप्रदर्शनात्मानमासादयत्याञ्जस्येन । स एष परिणामः संस्कारापरनामा स्वानुरूपक्रियाप्रसूत्युपपत्तिलक्षणां स्मृतिमन्यादृशीं सञ्जनयन्संस्कारवत्तामनुभावयत्येवोचिताकाराम् । अप्राणा अपि शिलारसपुरोगमाः सप्राणा इवाऽचरन्ति, महिम्ना सविशेषमनुकूलसंस्काराणाम् । गृहाः पात्राणि सम्भाराश्चान्येऽन्ये मुग्धैरप्युपयुज्यमानाः प्रयुज्यमानाश्च कारुविभेदैरविवादमुपपद्यन्ते संस्कारसध्रीचीनाः । सिकताद्या वा संस्कारमापाद्यमानाः संमार्जनक्रियायां किरीटादेः साधनभावमुपयाताः संवीक्ष्यन्ते । इत्थं च सर्वेष्वेव वस्तुष्वनुभूतिमहिम्ना सत्सु हि संस्कारवत्सु द्विजाधिराजैस्तद्वत्तयोदितादिशा वर्तितव्यमित्येतत्कस्मा आश्चर्यमनाश्रितविचाराय वाऽऽजनयेत् । अपि त्वतद्वत्तैव तेषामभिप्रवर्तयति विस्मयातिशयं विस्मृतात्मस्वरूपाणामर्वाचीनप्रचारपरिचिन्तया । यद्यप्युपन्यस्ताः संस्कारा अलङ्कुर्वते

३४ असत्संवादव संस्काराणामशेष-[illegible]माङ्गल्ययोजकत्वनिरूपणम् ।



बहूनेव कृतसुकृतानिदन्तनान्सुखजातान्तथाऽपि भूयोयुषोऽपि भूयिष्ठाः सपरिवारा अनिस्वाः सन्तः प्रतिप्रान्तमध्यक्षमीक्ष्यन्त इत्युदितप्रमादप्राप्ततदभावबाहुल्यापेक्षया घटतेऽसौ समीक्षेत्यनुसन्धीयतान्तावत् ।

नन्वमीषामेतद्विषयवैकल्यवैपुल्येऽपि गुणान्तराणान्तु विद्याविनयश्रद्धासदाचारादीनां साकल्यान्न हानिः । मैवम् । एतेषामपि यथावस्थितवस्तुव्यवस्थानसमृद्धानान्तावदस्ति हि संस्कारव्यक्तिरेव मूलमतस्तद्दारिद्र्यमनुभवन्तो हन्त मन्दीभवन्त्येतेऽपि तेषां नन्दनसन्दोहाः । मानसममलं न भवेद्यावत्संस्कारसंसेवनैस्तावत्स्वान्तरवृत्तिविकारनिकर उन्मीलन्नेव साचिविकारां ननु विद्यां विनयं श्रद्धां वा समाचाराञ्चेयदेवाविवादं तत्कामः । संस्काररश्मयो हि मतिविक्रान्ततमिस्रां तिरस्कुर्वाणाः स्वालोकविभूतिविशेषमेवातन्वते संराधकचेतोभूम्याम् । स खल्वालोकः सर्वानेवार्थान्स्वात्मसत्तया परिच्छिनत्तीति व्यग्रतेव करणत्रयगताऽवतिष्ठेत् । प्रमादालस्यतन्द्रादयो दूरीभवेयुः । त्रुटिनिमेषक्षणमुहूर्तयामदिनत्रियामापक्षमासादिभेदभिन्नकालात्मानं नयन्नपि वृथा नातः परं तदमूल्यभावादशेषविशेषसम्पत्प्रदात्प्रमाद्येत् । कृत्यमात्मीयन्तन्माहात्म्यादनुनिवर्तयन्नन्यमुपदेश्यानप्यात्मनः कृतार्थीकुर्यात्सदाचारप्रचारणेन । इयमियं हि सरणिः पुरुषार्थाभिधायिनी द्विजाग्रणीनां सती तत्प्रभावादेव सर्वास्वपि राजधानीषु लब्धप्रतिष्ठाःप्रतिष्ठिततराभिर्बहुतराग्रहारसंलाभलक्षणजीविकाभिरात्मपरम्परां बिभ्राणा अभूवन्नेव बीजिनः साम्प्रतिकानामभ्यात्ताशेषतन्त्रस्वातन्त्र्याः । परम्परासञ्जाता अमीषां सम्पन्नाशनवसनतया

३५ तल्लोपेन जायमानकालहान्यादिविकृतपरिणामप्रदर्शनं हि सोदाहरणम् ।

पर्यायेण विद्यासदाचारादीन्विद्विषन्त आत्मप्रणालीमपरामृशन्त-
श्च लीलासु हन्तार्वाचीनास्त्वभिनिवेशातिशयवन्तो विस्मृतवन्तश्चे-
तिकर्तव्यतां दरीदृश्यन्ते । एवंरूपाः किं किं न कुर्युर्निरङ्कुशा-
वर्त्मानि इति कल्पनाः कृत्यानुकूला नृत्यन्ति किलात्युच्चैः । अ-
जीविकास्तु जनाः प्रायेण विद्याया अभ्यसन्तो ग्राह्यकोटिका
अप्यग्राह्यतानिर्ग्राहिकतद्ग्रामिवैमनस्याभ्युपद्रुताश्चान्तराल एवा-
वतिष्ठन्ते निरुत्साहाः । प्रौढ[illegible]विशालास्तु स्वाभीप्सितं प्रसा-
धयेयुरेवेत्यन्यदेतत् । इत्थमनेकसामयिकदूषणगणपराभूताः सन्ता-
नभूता अपि तेषामुत्तरोत्तरमात्माभिवर्द्धनाय हानिं परामवजानन्तो
विवेचयन्तश्च यथोदीरितश्रेयोमार्गे प्रयतेरन्नादरभरैः सर्वास्वे-
वावस्थासु । तेन ह्यसाधारणीं स्थितिं पुरातनीं प्रतिपद्येरन्यथो-
त्साहसमज्जितमतयः । परमेषा सुदशा विकृतसंस्कारधार-
याऽमीषां वर्तमानकालीनया च बहूपप्लवजातसञ्जातया आप्नु-
यान्निजपदं न वेति संशय्यते विकल्पशीलिभिः । व्यग्रीभव-
दन्यान्यसामग्रीकैर्वाऽविकम्पितमतिभि " उत्सेक उदधेर्यद्वत्कु-
शाग्रेणैकबिन्दुना । मनसो निग्रहस्तद्वद्भवेदपरिखेदतः " इति
टिट्टिभोपाख्यानमाहिमानमनुसन्दधानैः स्वाभीप्सितमभिपत्स्यत
एव दुरासदमपीति निश्चीयते पुनर्वैपश्चित्सङ्घैरन्यादृशैः । न
च नो ब्राह्मण्यमेव माहिभूत्क्लेशावहविद्वत्ताश्रद्धासंस्काराधनी-

२६ सर्वं किल चराचरं पुरुषकारैकपरायत्तमित्युपवर्णनम् ।

दृशविग्रहमनन्यसाधारणमिति साम्प्रतम् । स
वैदेशिकसंस्कारविजातीयसंस्काराऽसम्भव्य-
यात् । अत्रैवं ब्रुवाणो व्याकुपितमनाः पृ-
ष्टो व्याचष्टां किमसौ स्वकाले क्लेशातिशयदायितया विद्वत्तादी-
न रोचयत आहोस्विद्ब्राह्मण्यमेव उत द्वे अपि ते । न [illegible]-



तीयः । उभयोरप्यरुच्यामरुचिमानयं योग्यतासामान्यसम-
न्वस्यानास्पदतया वैदेशिक एव तस्याः सम्पद्येत सर्वशः ।
तेन चानिष्टमेवेष्टं प्रसाधयितुमनसः प्रत्ययं स्यात् । नापि द्विती-
यः । समग्रसकलसत्सामग्रीकस्य किं ब्राह्मण्यस्य सद्रूपत्वेनोपा-
देयतयैककोटिकतयाऽनुपादेयतालक्षणारुचेरेवोत्पत्त्यनुपपत्तेः । या
या लोके सदर्थसमासादनानुकूलरुच्युत्पादनाफलशालिनी प्रत्यु-
त विपर्ययफलिनी पदार्थव्यक्तिः सा साऽसत्येव । यथा कामा-
दयो, मृगतृष्णिकादयश्च । न खल्वेते पुनरेता अविचारितरमणी-
या द्रागित्येव दृष्टनष्टस्वरूपाश्च वस्तुसत्त्वाऽव्यभिचरिताऽऽत्म-
भूतेन सम्बन्धमाप्द्येरन्जातुचित् । व्यभिचरितप्रकृतिकत्वादे-
वात्मनः । न वा आदिमः । न ह्यसौ क्लेशं सहेत मद्दृमान
आकस्मिकफलभुग्वा उपजायते । कार्यस्यैवाकारणकस्यास्व-
रूपप्रतिपत्त्युपपत्तेः । सर्वे चामी भुज्यमाना विषयविभेदा राज्य-
भोज्यादयो निजनिजसम्भारसमवासन्नौपयिकसमुचितश्रद्धाप्रय-
त्नश्रमातिशयसमाधानादिसातत्यैकसम्पादनीयमूर्तयो विविच्यै-
वोच्चीयन्ते व्यावहारिकप्रज्ञावद्भिः । न तु तावद्भोज्यमेकतमं
वा कृत्यं वा तद्रूपनिरूपकं निरूपणं वा रूपकविन्यासप्रयासमन्त-
न्तरा परिश्रमं प्रभवेद्वा कश्चिद्भोक्ता कर्ता वा निरूपयिता क-
थञ्चित्सम्पादयितुं समवाप्तुम् । न ह्यन्तरा परिश्रमं कृषी-
वलस्य धरण्यां सङ्ग्रहकृत्यं बीजस्योपपद्यते पर्जन्यसमीरणादि-
समीरितस्य वा नाप्यवधातोः साहाय्यसम्पन्नस्याऽप्यस्य सेचन-
कार्यं यथानियममुत्तरकालम् । न वा शालयः स्युः पाल्याः
पाकपर्यन्ताः । न चापि तण्डुलदशामृच्छेयुर्धान्यान्यवघातमृते ।
न चापि तण्डुला इन्धनहुताशनसलिलाद्यत्यासन्नसाधनसंयोजयि-

तारमृते पक्वारं तावच्चेतनावन्तमौदनमावायाऽवकल्पन्ते श्रमवन्तं च । न वा अभ्यवहारायासीनोऽप्यात्मपाण्यास्यप्रचेष्टितमृतेऽशनायां वा पिपासामश्नमाशित्वा तोयमापीय वोपशमयेत् । न वा विना तैरसर्वीर्वैविपाकादिसम्पत्तिर्देहवतां प्रसूतिमापद्यते । नापि पुनरनादृत्यैर्मौल्लौकिकालौकिकसमालोचनाकौशलशालितौदीयते श्रेयस्कामानाम् । न वा कौशलेनान्तरेणानेन मेधामनीषाचित्तस्मृतिविज्ञानानि “ याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति । पर्जन्येनौषधिवनस्पतयः प्रजायन्त ओषधिवनस्पतिभिरन्नं भवति । अन्नेन प्राणाः प्राणैर्बलं बलेन तपस्तपसा श्रद्धा श्रद्धया मेधा मेधया मनीषा मनीषया मनो मनसा चित्तं चित्तेन स्मृति ९ स्मृत्या स्मार ९ स्मारेण विज्ञानं विज्ञानेनात्मानं वेदयति । तस्मादन्नं ददन् सर्वाणि भूतानि ददाती ”ति तैत्तिरीयारण्यकगतश्रुत्या किल याज्ञिक्या सारवत्तयोदाहृतान्यादृतानि स्युरन्तिमफलजननान्यपि येन चेष्टयोगानिष्टसंयोगौ स्यातामपरिहार्यौ । ऋजुरक्षरार्थः । मा नाम तत्प्रसञ्जीति परिश्रमैककल्पमहीरुहः सेवनीय एवाऽस्त्यापन्नसन्तापहन्ता ननु समस्तानाम् ।

३७ प्रारब्धस्य प्राधान्यं मन्यमानं प्रति तत्पृथक्विवेचनमुखेनाधिपुरुषार्थ एव बलवानिति स्थिरीकरणम् ।

ननु प्रारब्धस्यैवारम्भसामान्यमूलितया तद्बलादाञ्जस्येन सत्यां नः फलावाप्तौ तत्कस्य हेतोरसावायःसन्हुलपौरुषापरनामा उद्यमविशेष इति । बालम् । अत्र प्रारब्धे तव भक्तिं परीक्षमाणाः किञ्चिदत्र परिचोदयामो यावानेवोद्यमपदाभिधेयभूतस्तावन्तं नाभ्युपेष्यत यावता श्रमभन्तरा स्वकार्यावगमसावृन्तं मनुषे स्वारसिकमथवा



श्रमातिशयसम्प्रत्ययार्हमबुद्धिकलनाप्रवेशगो परं मत्वा परिजिहीर्षसि दुर्धरलौकिकालौकिकव्यवहारलोममाहोस्वित्तयोर्हेतुहेतुमद्भावप्रधानोपसर्जनभावयोर्न्यूनाधिकतासमधिगमप्रयुक्तवैषम्यं विजानासीति । न तावदाद्यः । “यावद्वचनं वाचनिक,, मिति न्यायात्स्वाभिधेये निरूढे सङ्कोचगःपरविचारणायाः सत्याकृतावप्रामाणिकत्वात् । असत्यान्तु तस्यां सान्निध्यवाक्यशेषत्वाभ्यां लक्षणया वा स्थाने तन्नयनस्य स्यादेवोचितता । नेह तदभावाच्चभावः । न द्वितीयः । निर्णीतेऽर्थे स्वाभिमतेरनवस्थितचराया अकिञ्चित्करत्वात्प्रत्युतोत्कृष्टक्रियाविशेषबाहित्वाच्च । नापि तृतीयः । श्रमाधिक्यसंसाध्ये धर्मिणि परिजिहीर्षा न भवत्येव प्रयोजिका जातुचित् । अपि तु परिलिप्सैव समुचितसामग्रीसम्प्रयोगयोग्या । सर्वथा किलानया दुस्तरतराऽर्थावगतेरानुभविकत्वात् । इतरथा ते स्वल्वर्थाः स्वात्मभावेन प्रतीता एव न स्युः । न वा तुरीयः । वैषम्यसादकमानप्रतिपत्तौ तादृग्रूपेणैव तन्निर्धारणस्यौचित्यात् । किञ्च प्रारब्धमेव श्रद्दधानस्त्वं किमात्मफलतया तदनुभवसि किं कृत्यात्मना आहो पुनस्तदुत्पादकात्मना । न तावत्पूर्वः । कृत्यस्यैवानुभवविषयतया ततोऽतिरिक्तप्रत्ययमात्राधिरूढप्रारब्धस्यामूर्तिमतस्तत्स्वरूपापत्त्यनुपपत्तेः । नाप्यपरः । कार्यजननानुकूलानन्यथासिद्धप्रतिनियतपूर्ववर्तिसामग्र्यां नामाऽनुभूयमानायामप्रवेशादेतस्य । नो खलु देहाद्याङ्कुरादेर्वा कारणीभूतशुक्रशोणितवद्बीजादिवच्च कतमस्मिन्नपि कार्ये कार्यार्थिनां तदर्जनतद्गोपनतयोजनाऽनुचारिसञ्चारस्यैव विचारचित्तानामपि व्यवहारवेलायामप्रवृत्तेः । न हि प्रवृत्तावप्रवृत्तिस्वभावं वस्तु किञ्चित्प्रवेष्टुमीष्टे । स्वस्वभावविपर्यासाऽनु-

पपत्तेरदृष्टप्रयोज्याविशेषप्रसङ्गाच्च । अथापि कृत्यं प्रति कारणभावं प्रारब्धस्य मन्यमानस्तदिदं समवाय्यसमवायिनिमित्तानां कतमत् ब्रूते । नैतत्समवाय्युपपद्यते । अवयवाऽवयविभातिन्यक्त्यादेर्यो निरूपणस्वरूपपर्यवसायित्वानन्तर्भावात्प्रारब्धपदार्थस्य । यदीदं गुणतयाऽद्रव्यतया समवायिकारणभावः । यदि वा द्रव्यं तदाऽपि गुणवत्क्रियावत्त्वसंस्थानानिर्वाहाय तयोरुभयोरन्याप्याहितत्वे तस्य तु प्रत्यर्थं साधारणतया नानाधारत्वस्वरूपप्रतिष्ठानं संसिध्येत् । नाप्यसमवायि । दृष्टादृष्टयोः संसर्गस्यैवाभावात् । न वा निमित्तम् । कुलालादेरिव कृत्यसम्भारमेलनानुरूपव्यवहाराणामप्रसादेवाद्रा सद्यः प्रारब्धस्य दृष्टविदूरवर्तिनः । पारिशेष्यादन्यादृशकारणभावमप्यादिमं वैत्यप्रकल्पनाः प्रारब्धमुखादनन्तरानुमानपुरःसरं ज्ञानमात्रम् ।

नतु प्रारब्धपुरुषार्थौ किंनामानौ किंलक्षणौ च वा-

१८ प्रारब्धपुरुषार्थयोः प्रमाणलक्षणव्याख्यापनम् । — स्यामनतरा न तावुभौ यौ भवतः । उच्यते । प्रत्यक्षानुमानागमादयो यथायोगमिति । प्रत्यक्षं च चक्षुरादिभिर्निर्ग्राह्यमिति प्रारब्धम् । तत्प्रवृत्तिप्रयुक्तस्थूलप्रत्ययसन्तानं अपि निदानभूतमानसप्रत्ययप्रवाहस्यानपनोदनीयसहजसंस्कारवासनाभावनाऽपरपर्यायाहारिलक्षणो मनीषिणां प्रत्ययप्रणालिकयैवास्य हि प्रारब्धस्य सूक्ष्मप्रत्यक्षविषयीकरणात् । दर्शनश्रवणस्पर्शनरसनघ्राणनवचनादानगमनविसर्जनानन्दमननबोधनादयो धर्मा ज्ञानेन्द्रियकर्मेन्द्रियमनआदीनां प्रातिस्विकरूपेण प्रारब्धनन्दनभासयन्त्यनवरतम् । इतरथा निर्निमित्ता इमे धर्माः प्रादुरभूवन्न कथञ्चित् । प्रादुर्भवन्तश्चैते प्रादुर्भावयितारमनामयबाधयन्तमस्मत्पूहमनुमापयन्तीत्यनु-



मानमप्यवसेयं प्रारब्धे । उपमानस्य यथा भावस्तथा भाव्यमितिविषया प्रारम्भस्तथा प्रारब्धमिति प्रतिपद्यते । आगमः खल्वपि " दैवञ्च प्रयत्नश्च । द्विविधो वासनाव्यूहः शुभश्चैवाशुभश्च तौ । वासनौघेन शुद्धेन तत्र चेदनुनीयसे । तत्कर्मणाऽस्तु तेनैव मामकं पदमाप्नुहि । अथ चेदशुभो भावस्त्वां योजयति सङ्कटे । प्राक्तनस्तदसौ यत्नाज्जेतव्यो भवता कृप " इत्यादिस्तत्सत्त्वे प्रमाणं पैप्पलादमैत्रायणादिशाखीयः । अर्थापत्तिरपि । वाल्मीकिः कविकुलशिखामणिर्गुरोर्नाङ्गमहीदेति विष्णुमित्रः प्रासपरमैश्वर्यो न तत्साधनसामग्रीं दृष्टरूपामसेवतेत्येवंरूपा प्रमीयते । स्वकाले ऐश्वर्यसम्पादनानुकूलदृष्टसाधनसामग्रीविरहवत्त्वेऽप्यनन्यपाक्षिकसाधनसामग्रीमात्रगोचरपुरुषप्रयत्नान्यथाऽनुपपत्त्या तद्धेतुभूतमन्मान्तरीयप्रारब्धं परं फलायालं प्रकृतायेत्युपपद्यते । अनुपलब्धिः पुनस्सकलाऽपि काचित्पुम्प्रवृत्तिरर्थाभाववती अत्र सर्वाभावे विशेषणं सोऽयं दृष्टसाधनेतरसामग्रीमात्रप्रयुक्तोऽवधार्यते सा किल दृष्टान्या अत्यदृष्टैवेति प्रारब्धमदृष्टमित्यनर्थान्तरमिति भेदावगाऽपेक्ष्या ।

एवञ्च मानैः षड्भिरपि प्रारब्धस्याऽवधारितेऽस्तित्वे

१८ समस्तान्येव प्रमाणानि पुरुषकारस्वरूपस्थापनपर्यवसायीनीति ज्ञापनम् । — पुरुषार्थोऽप्येवमेवास्ति सार्थक्यसम्पादिभाक् सर्वेषाः । सति चैवं लौकिकालौकिकप्रमाणप्रयोगाशयो व्यवहृतयो हृदयाधिगतयश्च प्रतिप्रत्ययं प्रसूतिमुपयाता भवन्त्युभयाप्यसम्यक्प्रमापिकारिभेदभिन्नप्राणभृतां यथायथम् । सर्वे प्राणी सङ्कल्प्य वा पूर्वमप्य पुरुषकारमेवावगाहयन्तीत्येककण्ठ्यतात् । इच्छाभिहासानुगुणाः प्राणिनः समस्ता एव फलविशेषतृष्णया वाङ्मनःकायैः प्रेर्यमा-

णाः पुरुषकारनिर्वर्तनपरा भवन्तीति प्रचण्डं खलु प्रत्यक्षं मुग्धात्मनां वा । अनुमानं च बुद्धिजीवी स्वात्मानुगुणकृत्यानुसन्धाता तत्सत्तापरायत्तस्वार्थसमर्थनशीलत्वात् । य एवं स एवम् । स्वसंयोजनाशीलशकुनिरिव कुलाये । यो नैवं स नैवम् । यथा नगनागादयः । उपमानमपि सद्यः स्वसमायोगशालिवदतीतानन्तप्रेक्षाकारी । आगमश्च " गुरुरनुगन्तव्यः । स्वाध्यायोऽध्येतव्यः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । देवपितृकार्याभ्यां न प्रमदितव्यम् । यान्यनवद्यानि कर्माणि तानि सेवितव्यानि । नो इतराणि । यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि । नो इतराणि । धर्मे चार्थे च कामे च नातिचरितव्यम् । आत्मानमुपासीत । आत्मानं विद्धि । आत्मानं जानीयाः । तस्मान्निःश्रेयसमभिगच्छे " दित्येवमात्मा श्रुतिस्मृतीतिहासपुराणादिवाङ्मयप्रपञ्चलक्षणश्च कृत्स्नोऽपि प्रतिप्रकरणं क्रियमाणव्याहारपरम्परापर्योपत्तिसहस्रेणाध्यवसीयते । यन्महिम्ना पुरुषकारप्रक्रियातिरिक्तदक्रियानुष्ठेलो निःश्रावगतिनिरूपणैकतन्त्रा परं पुंसाम् । गुरोरनुगमनं नाम शास्त्रार्थपरम्परायाथार्थ्यावगमहेतुभूतपुरुषविशेषपादोपसर्पणपुरःसरमभिगन्तव्यावैशेषसर्वस्वावधारणम् । इदं हि पुरुषकारात्मकपुरुषकाराकारदुर्भेद्यशाविशेषं निरापद्यते । समावर्त्ते च तत्प्रवचनलक्षणव्यामुग्धपारम्परीमसाधारिणी बुद्ध्यादिदौर्बल्यविच्छेदाभिधायिनीमतितराम् । स्वाध्यायश्च स्वस्य चोपिशादेः परम्परापरिप्राप्तवेदराशयोगोचराध्ययनानुकूलो विशि-



ष्टप्रयत्नविशेषः । वैशिष्ट्यं च प्रयत्नविभेदे वक्ष्यदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वलक्षणम् । तदिदं क्षेमङ्करमेव लोकम्पृणगुणस्तोमसमासञ्जकतया सर्वकालम् । न चायं स्वाध्यायशब्दो वेदानामेव केवलं वक्तीति चतुरस्रम् । लौकिकालौकिकविद्यामात्रं प्रति वेधकत्वैकसाधनभूतं नामोपलक्षणार्थत्वात्तच्छब्दस्य । न ह्यपार्थसमर्पिका काचिदस्ति विद्या यां खलु वेद्यार्थकोविदाः स्वारस्यातिसेधिरे । न वा " अयोग्यो विषयो नास्ति योजकस्तत्र दुर्लभ " इति न्यायो विद्वन्मानवमान्योनोपपद्यते । इतरथा कोटिं हन्त व्यावहारिकीं वा न प्राप्नुयात्सा सर्वैव प्राप्नुवन्ती तु सा सप्रयोगिनित्यप्रयोजनकशङ्काकलङ्कानवकाशः । न वा वाक्यमेतत्स्वस्याध्ययनाध्यापनानुष्ठानानुष्ठापनलक्षणपुरुषप्रयत्नमवबोधयन्नोज्जृम्भते । " सत्यान्न प्रमदितव्य " मित्यत्राऽनृतप्रासङ्गलक्षणप्रमदलाभसत्युद्घोषितविशिष्टक्रियासमापत्तिः सत्यमुच्यते । क्रियायां वैशिष्ट्यं च सामानाधिकरण्येन यथादृष्टयथाश्रुतार्थसङ्गीतिम् । एतेनाप्यत्रोक्तपुरुषकारप्रयोजकीभूतस्य हि सत्यस्य सकलार्थनिवृत्तिसंयोजयितुर्गौरवातिशयभूमैरेव महिमा च पुरुषकारपरात्मा चकास्त्यतितराम् । " धर्मान्न प्रमदितव्य " मित्यत्राप्यनुष्ठेयसामान्यप्रच्युतिभावविमुखीकरणगोचरमतयापरपर्यायपुरुषकार एवानुवर्तते । " कुशलान्न प्रमदितव्यानि " त्यत्र स्वात्मकुशलसामान्यनिरूपकनैसर्गिकपात्रप्रकारानयिकादिभेदभिन्नविधानस्यानवधानताव्यावृत्तिरुपदिष्टा प्रतिपद्यते । इयं हि शिक्षा विशिष्टविशिष्टमानुषमात्रस्वरूपसाधारणी परं पुरुषप्रयत्नविस्तीर्णबोधिकाहिताचरा । आगेषा " भूत्यै न प्रमदितव्य " मिति प्राकृतसम्पादनाय नानिष्पादनाविशेषाभिविजातीयप्रयापारप्रभव-

वननेत्री समुन्नीयते । वैजात्यं च व्यापारे सौमनस्यसहकारव्यक्तीकारापराहतचेतस्कता । सा किल गम्यते सार्वकालिकी दाक्षिण्यक्लृप्तायासनिर्भासिनी च । इहाऽपि पुंप्रयत्न एव रत्नविभेदसमुद्योतनविस्तरस्तथा संमीयते “ स्वाध्यायप्रवचनाभ्यां न प्रमदितव्य„मित्येतदपि वचः समुदाहृतसत्यादिनानाव्यवहारव्यापृतान्तःकरणत्वेऽप्यध्ययनाध्यापनयोः प्रतिपत्तव्यार्थजातप्रयोजकीभूतयोरादरातिशयन्तावत्पुरुषाणामर्थसंसाधकं विदधानं प्रतिपद्यते । “ देवपितृकार्याभ्यां न प्रमदितव्य„मिति हीयं वाणी स्वर्गादिपुण्यलोकफलावाप्तिहेतुभूतस्य हि कर्मणः देवपित्र्यादेरभ्युदयापरनाम्नो द्वारेण पुरुषधौरेयान्प्रति पुरुषार्थं विधत्ते । “यान्यनवद्यानी”त्यादिना वचोजातेन निन्दितानिन्दितयोः शिष्टाचाराचरणलक्षणयोर्युक्तायुक्तस्वरूपविवेचनपुरःसरं कर्मणोर्हानोपादानप्रक्रियासमाश्रया तावद्व्यवस्था नूनं पुरुषकारमहत्त्वानाकम्पिनी च समाख्यायते । अर्थापत्तिश्च । मैत्र्यादयो निरवच्छिन्नसर्वकार्यरमाका नापरोक्षं साधनसंपत्तिता इत्यत्राद्यव्यूहविस्तरविभूत्यन्यथाऽनुपपत्त्या तद्धेतुभूताबाधितसाधनसामग्रीरूपमनुष्ठानाभिमुखीभूतपुरुषकारप्राग्भारः परोक्षप्रतीतिसाक्षिको मैत्र्यादिनिष्ठः प्रकल्प्यते । अत एव “ नोपायेऽधिको यत्नः कर्तव्यो नोपेय ” इत्युक्तेर्भगवतो भाष्यकृतामनुग्राहिकाऽभ्यर्हता तावत् ।

अनुपलब्धिश्चापि दर्शितदिशा प्रकृतार्थे ऊहनीया । इत्थं प्रमाणमूर्तयः पुरुषार्थसाग्रहमरैर्विषयीकुर्वाणाः प्रगल्भन्ते । प्रारब्धं च भावतूर्णावच्छिन्नविकर्षीभवद्ग्रसमानिदानमर्थसूचकप्रसूनकप्रसूतिहविविधानुभूतिलक्षणसंस्थानानिष्ठभयोज्झितानिरूपितप्रवो-



४१ प्रारब्धस्य लक्षणं स्वरूपं पुनर्विश्वव्यापित्वम् ।

भकतावदनीहक्प्रकालिकपरिच्छित्तिभावात्मा प्रख्याविभेदः । भावना वासना संस्कार इति चानर्थान्तरम् । तस्यां विकर्षीभवनं चाव्यक्तदशाविशेषनिर्धिःकार्याकारानुरूपव्यक्तीकारक्षमा प्रफुल्लचमत्कारप्रत्ययः । अनुभूत्या वैशिष्ट्यं च कारणात्मना च कार्यात्मना स्वाव्यवहितपूर्ववृत्तित्व स्वाव्यवहितोत्तरकालवर्तित्वमाकलितगुणसम्बन्धेन । परिच्छिन्नतावदनीहक्प्रकालिकत्वं च व्यक्तावगतिविजातीयावगतिकत्वम् । लक्षणमेतत्प्रतिप्राण्यसङ्कीर्णारम्भसामान्यसूक्तिव्यवृत्तापरनामन्युपपद्यते यथायथं विश्वस्मिन् । सर्वो ऽपि हि देहभृदेतल्लक्षणलक्षितेन परिच्छिद्यते प्रारब्धेनेत्येतदेवं समष्ट्या वा व्यष्ट्या निदानभावमुपयाति चराचराणाम् । तद्यथा । देवाश्च वा असुराश्च मानवा नरा नार्यश्च आप्रस्वप्रसुप्तपाकप्राप्तितो अस्था ओषध्यो वनस्पतयश्च पार्थिवा दिव्याः पशव आरण्या ग्राम्याश्चापदाः पक्षिणश्च व्यालाः किङ्कालेन यथायथमहोरात्रे भूतं भवद्भविष्यच्च । नाणुर्वा सत्तो ऽमुष्य मुच्यमानो ऽस्तित्वमापद्यते मनागपि । आपद्यमानो वा ऽस्तित्वं नातथाभावमाप्याल्लक्षणीयः । अनपनोदनीयनरसत्तासामान्यानुगतत्वात् ।

पुरुषार्थस्तु साधकबाधकसामग्रीपरिणामसंवेदनाधीन-

४१ पुरुषार्थस्य लक्षणं स्वरूपं तु परं माहात्म्यं तत्प्रकाशनं तावदनुवर्णनं विशिष्टेनाधिकपता-दिति निरूपणं च ।

विशिष्टेप्साजिहासाऽनुरूपप्रयत्नास्पदवस्तूपायप्रयोगपर्यवसायी धर्मविशेषः । ईप्साजिहासयोर्वैशिष्ट्यं च स्वस्वेतराभ्युदयसंधीक्षणौपाधिककृतिमूलसम्बन्धेन । असावपूर्वः प्रारब्धमिव चराचरव्यवस्थामुदिततरमेऽपि-

चवस्तुसमवायां सर्वास्वप्यवस्थासु परिच्छिन्नत्वाविशेषात् । न खल्वेकोऽपि वपुर्धारी स्वस्वरूपोपचयापचययोग्यताऽनुविधायिचेष्टामृते संस्कारविशेषसध्रीचीनां प्रयते कथञ्चिज्जगत्याम् । प्रयमानाः सर्व एवैते निर्वर्णितचेष्टावन्त एवानुभूयन्ते सर्वकालम् । न हि तावच्चेष्टानिर्वेदा नानाव्यवकथचेष्टाभ्यो व्यावर्तयितुमर्हन्ति स्वाभ्यो वा जातुचित् । व्यावृत्तव्यापारास्तु शनकैर्वा विनश्यदवस्थापन्नाऽनुभूयन्ते सुसमृद्धा अपि समयान्तरे । सुरूपोऽपि विरूपः । सुबुद्धिरप्यबुद्धिः । सुविद्योऽप्यविद्यः । सदाचारोऽप्यसदाचारः । सुनीतिरप्यनीतिः । सुद्रव्योऽप्यद्रव्यः । सुमार्गोऽप्यमार्गः । सुसाधुरप्यसाधुः । सुगतिरप्यगतिः । सुभक्तिरप्यभक्तिः । सुमित्रोऽप्यमित्रः । सुकीर्तिरप्यकीर्तिः । सुयशा अप्ययशाः । सुवीर्योऽप्युच्छिन्नवीर्यः । सुसन्तानोऽप्यसन्तानः । सुसाम्राज्योऽप्यनासादितासन इतीमा अपरिहार्या एव विपरीतप्रत्यया आपद्यन्ते सत्येव दौर्गत्ये यथाऽभ्युक्तपुरुषार्थप्रतिपत्तेर्न्यायप्रासादाः ।

केचित्तु प्रारब्धं वा पुरुषार्थमजानाना उपयातिमात्रेव नैसर्गिकीमप्रमाणपदवीमुसंस्कृतां वृत्तिमनुवर्तमाना यादृच्छिकीं पुनः सामयिकीमाश्रयन्ते पुमांसो भूयांसः । अन्ये तु दैवमेव स्थितं मन्यमाना अभद्रचानाश्च पुरुषप्रवृत्तिं प्रस्तुत तस्मै वैरं पुरुतरं प्रयोजयन्तश्च भद्रयन्मानसाः पुनः स्वार्थादुद्विजन्ते । अपरे तु पुरुषार्थमेव स्थिरतरं कुर्वाणाः प्रारब्धं च न्यक्कुर्वाणाः प्रवृत्तिमन्तोऽप्यनासादितनिजाभीष्टसारिष्टाविधेया अन्तरायसमूहैर्मुहुर्मुहुः पराहन्यमाना अंशस्यमाना वा तेभ्यः फलं प्रतिपद्यमाना जाग्रति हि मनास्थाम् । इत्थं च प्रारब्धपुरुषार्थया-



दिनामुदासीनाश्चेति त्रयः पक्षिणो जगच्चर्ययाऽधिगम्यन्ते । तत्र त्वादिमान्तिमौ मध्यमाधमौ । अन्तर्वर्ती तूत्तम एव सर्वतन्त्रसिद्धान्तस्वारस्यादवगम्यते यतो मनीषिनिवहाः सार्वदिका भरमाद्रव्याऽर्जितवन्तोऽर्थयन्तश्चार्थं पुरान्तराजन्ताऽप्य राजन्ते । विहीनाः पुनरेतेन पुरुषकारेणानुभवन्त्य भवन्त्यपुरुषार्थिनोऽपार्थसार्था वा सर्वशः । निरवशेषा एवार्यवर्यीयाः सत्त्ववर्चीनाः सार्ववर्णिकाः पुरुषकारैकारिक्ताः कृतकरणत्रयात्मान आसन्नेवाविवादं यत एत आस्यजातबाहुजातादयो याथातथ्येन स्वार्थजातात्प्रच्युतिमापन्ना विद्याभ्यः कलाभ्यो नीतिभ्यः सदाचारेभ्यः समयसत्प्रयोगैकमत्यानिर्व्यसनगुणग्रहणदोषत्यजननिरालस्यादिभ्यश्च निःशङ्कं श्रोत्रियसामन्तसम्भावितादिवंशोत्पन्ना वा तीर्थक्षेत्रराजधानीसदालयानाम् । प्रायशो वसुधेश्वरा हन्त नर्तनखेलनसभ्येतरवादचञ्चुसम्मर्दनपारवश्यामिषाशनसीधुपानद्यूतसमाह्वयाप्रवृत्त्यनेकाङ्गनासङ्गानिषततरानिद्रातन्द्रालस्यादिपारवश्यव्यवहाराविमर्शप्रयुक्तभूयःप्रमदनप्रजाहितविधानविमुखीभवनदुर्व्यसनासक्तसंवर्द्धनविपत्परम्परापरिपतनात्मनो दुःस्वास्थ्यविभेदानाभजन्ते न तु जातु चेतसमाधानपुरःसरं स्वास्थ्यातिशयसम्पादनानुकूलान्धर्मानुदितार्थविपर्ययात् । भूपालानाममीषां मतिप्रदातारः स्वोच्छिष्टाशिनो जना बत चारणादयो दौवारिकादयश्च वञ्चयित्वैवान्तर्मार्जाराश्चासव इव जिह्मोपायैर्द्विजन्मनोऽपि व्यवहारविदो युक्ततरराज्यतन्त्रतन्त्रान्तररहस्यज्ञांश्चानृपानादिनो नित्यमप्रगल्भन्ते । न मनागपि स्वस्वामिसौभाग्यसमुपायानाचक्षते न वा भद्रिदमन्त्रं बोधिता अपि शतशः । नापि तत्र जिज्ञासा तेषामुदेति स्वप्ने वा । सर्वस्या अपि समग्रया ए-

तस्या आत्मप्रकृतिं प्रति विप्रलापितत्वात् । न हि तावद्विपक्षसामग्रीकाः सपक्षसामग्रीमद्भिः पुंभिः समं सौभ्रात्रमर्हन्ति । इतरेतरविरुद्धाधिकारसम्परीतमानसत्वात् । एवमनेकप्रकारकाससम्परातत्वात्वादेवाऽतनुभूतिमहीकृतप्रार्पितानुभावतनूभवतनूभवत्वेऽपि सम्पन्ना पर्यायेण विनष्टविभवातिशयाः परिभवभूमयो निरन्तरं भूत्वा पयुरेवास्ते दुर्दैवया इति नेह कश्चित्सम्राड् वा सम्राट्पुरुषो देशकालादिर्वाऽपराध्यति कथ ... । यथाभूतमध्यारोपयन्तोऽपराधं सम्राट्पुरोगमेषूपन्यस्तपराभूतिभावसामन्तास्मदौरात्म्यफलप्रदायिभूजिहतविचाराः एवापराद्ध्यन्ति । नाऽपि ते सुतरां तटस्थीभूय विचारमवतारयन्तो वा सुधीभूय सन्मार्गमवबोधयन्तः कंचिदप्यपराधमृच्छन्ति विमलप्रमेयप्रचारानुरूपमतिमान्या हि महात्मानोऽनभिप्रेतव्यवहारफलसम्बन्धा अपि विश्वासिनः ।

४१ पुनरप्यार्थपुरस्सरमार्थसंस्थवरायोधाहीनां प्रायेणा-देवगुणविभवो विभवानां ननु दूषणप्रमृणामपगुणमहामात्यसंस्था किमेति विधिवदेव सङ्कीर्तनम् ।

ननु त्वयैव ज्योतिश्चक्रे पुण्यपत्तननागपुरमहिषपुरकच्छपुरादिभूपोराज्याधिपतिपदप्रच्युतिप्रयुक्तं तावद्दूषणमप्रकृष्टसम्राट्पुरुषयोरेवेत्यभिहितवता ऽन्योऽन्य दोषविभेदाभिरूपितवता च कथमत्राऽकृतानां साम्राज्योपनिपद्भ्यन्याय्यप्रवृत्तिरप्युपपाद्यताम् । न खल्वसौ दोषः । सामान्यविशेषजनकभूतमनुभावोपादानोपहितव्यवधानवत्त्वेनास्माकीनानिरूढाऽभिप्रायसन्निधानसाक्षात्करत्वासत्त्वा निरूपणस्यास्यैव पुरस्तादुपपत्तिमहिम्ना न्याय्यप्रत्ययसमुद्दीपनैकस्वभाववत्त्वात् । एतावता निरूपणमेतादृशं भारतमण्डले वानवरीकृत्य पुरुषविभेदानां भ्रातस्वधीरत्वविधायकयोगवत्त्वनि-



राजस्योपस्थितसमयमात्रसमुपयोगकारित्वनिग्रहाऽनुग्रहव्यवहारपरायणत्वश्रीमत्सन्निधानक्रियासामान्यपराङ्मुखत्वप्रकृतिमण्डलीहिताभिधायिकप्रविशेषयोजयितृत्वकण्टकितपदवीशोधयितृत्वविश्वजनीनारोग्यदायिभेषजाकयादिप्रतिष्ठापयितृत्वविविधविद्याकलाकलापशिक्षणशालासंस्थापयितृत्वसमभ्यस्तविद्याकलापरीक्षणसमुत्तीर्णमानवाभ्युदयपारम्परीसम्पादकत्वविनिवृत्तनिर्वेशाघोसमीच्छ्रतासाभिरवच्छिन्नचेतनार्थवितीर्णत्वप्रजाचेतोहरणशीलितकलावत्त्वगुणैकग्रहणप्रयुक्तदीक्षाधरस्वमुद्रणसरण्योत्सन्नप्रायसर्वविषनिबन्धसंरक्षितत्वोत्तुङ्गश्रीविलाससंचोदितधूमशकटतारायन्त्रभूविमानमातरिश्वसञ्चारातियायियानयत्नावश्वरणनिर्माणवत्त्वादयस्तुलनासहिष्णवो विश्वजनीनप्रयोजनप्रसाधनपटवश्च विश्वोल्लासवासनासंवर्धनबद्धसन्धा अध्यक्षमीक्ष्यन्ते प्रभावभासः शतधा । न चोल्लसितमण्डलेऽस्मतिविभूमदौर्भाग्यमेवाङ्कलविशालप्रज्ञासौभाग्यातिशयपराभूतं नाभूदिति भूमितव्यम् । न हि तावद् दुर्गन्धोत्पत्तिभूते तद्घ्नायकसामग्र्या वा ततो व्यापकसत्तावत्सुगन्धस्य प्रत्यवस्थानप्रसक्तिरुद्भाव्यते । स्वात्माऽपि दौर्मनस्यं न सहत इति किमुतान्या परेषाम् । वैमत्यं वा हानिं वाऽद्धा प्रयोजयन्तो बान्धवेभ्यो वियोजयन्तो वचन्यजा अपि मित्रायन्ते । यथा चाम्नायते " आत्मनस्तु कामाय सर्वं प्रियं भवती " ति । अपमर्षः सर्वसाधारणोऽपि " यशो जनेऽसानिस्वाहा । श्रेयान् वस्यसोऽसानि स्वाहा । असन्तुष्टो द्विजो नष्टः सन्तुष्ट इव पार्थिवः । अर्जितं भेतुमन्विच्छेत् । यशः आत्मीयं प्रसारयेदि " त्याद्याः श्रुतयः स्मृतयश्च सामान्येनात्मनो यशःकीर्त्यैश्वर्यादिपत्त्यातिशयमवबोधयन्तोऽसाधारण्येन पार्थिवानां तमेतमेकक-

ण्ठ्येन विदधते प्रत्युत तदादेः परितृप्तिं मन्यमानानामात्महानिमाचक्षाणा यथोदितनरेशवृन्दपदप्रच्यवनादिगोचरा मतीरर्वाचीना निराचक्षते। यशो यशस्वी जने जनसमूहे असानि भवानि । श्रेयान् प्रशस्यतरो वस्यसो वसीयसो वसुतराद्वसुमत्तराद्वा असानि भवानीत्यसौ श्रुत्योरर्थः । ऋजुरर्थः स्मृतीनाम् । आखुरप्यात्मयशसः सम्पादनाय दुरुद्धरतममप्युद्धर्तुमविकम्प्यमपि विकम्पयितुमतिदीनैरपि रदनैरेवात्मीयैर्नगं तावद्यथोत्साहं खात्वा समाख्यायते पुरुषार्थदेशीयतया । अयमपि स्वकृत्यान्न मुच्यते यदा किमु वक्तव्यं बुद्धिजीविभ्यः कर्तृभ्यश्च व्यापकसत्तासम्प्रत्ययसमूहोपहितसाम्राज्यसम्पत्सरूपन्ना विदध्युर्निजेति कर्तव्यतां निःशङ्कमिति। वस्तुतस्तु गुणायैव स्पृहयन्तो दोषाय हि वैरायमाणा "गुणा मान्यस्थानं गुणिषु न च लिङ्गं न च वय" इति च न्यायमनुवर्तमानाः सर्व एव हि विचारचरास्तावतैवात्मानं कृतार्थयितुमुत्सहन्ते । नो खल्व पुमर्थनिदानभूततद्गोचरसङ्कोचविकासपुरोगमान्प्रवर्तयेयुर्योधात्म्यतृष्णया प्रेर्यमाणाः । ननु साजात्याद्यभिमानिनां नो वैजात्यादिकृतवर्तनवैषम्यं कथमिष्यताम् । नैष दोषः । आत्मसुखाद्यनुभूतिहेतुभूतप्रक्रियायाः पुरो न्याय्याया वैजात्यस्याप्याकिञ्चित्करत्वात् । न हि सजातीया वा साजात्यफलं प्रयच्छमानाः सर्वस्मै सर्वदाऽनुभूयन्ते किन्तु कदाचित्कस्मैचिद्विजातीयमपि । न वा विजातीया विजातीयेभ्यः प्रतिकुर्युरेवेति शक्यते नियन्तुम् । तथाविधेभ्योऽपि सकाशात्तथाविधानामुपकारस्यैवानुभविकत्वात् । एवं चेयमपि नावकाशं भजेदेवाशङ्का नूनमाकुलसम्राट्पुरुषाणामत्यासन्नश्रेयोऽभिजननव्यवहारप्रस्थानानां पुरोभागे । फलपर्यवसानप्रकारनिर्ग्राहकप्रारब्धपुरुषार्थयोरन्यतरस्मिन्नप्यपरि-



निष्ठितान्तरङ्गानामार्यवसुमतीसन्तानभूतसाम्प्रतिकोत्तुङ्गश्रेणीनां महार्घीमान्द्यमपेक्ष्य प्रायेणाभ्युदयचूडामणिं नाम पुरुषार्थमभ्यर्जयन्तश्चैत आकुलसम्राट्पुरुषविशेषाः पदवीं स्थेम्नो महिम्नो गरिम्णश्चारूढा असमानमानसोल्लाससमाह्लादशरच्चमत्कृतचन्द्रमा इव संशोभन्ते कलाकलापाऽऽविपाकाः । न चेदं ख्यातिलाभपूजार्थवचोऽस्मदीयं तेषां स्तवनात्मकमेवेति चोदितव्यम् । पुरुषार्थिपुरुषर्षभप्रवृत्तिपरिपाटीपर्यालोचनाधीनसहृदयभावैकनीयमानश्लाघायाः सौशील्यादिदोग्ध्र्याः ख्यात्याद्यनपेक्षस्वभाववत्त्वात् । न हि गुणिनं गुणीति ब्रुवाणा गुणरागिणो विजातीयवचोनिचयप्रयोक्तार इव चारणादयो विरूपविकल्पास्पदतामभिपद्येयुः कथञ्चिच्च । न हि पुनर्बको मीनार्भकापहर्तृविधर्मिध्यानैकतान इति मुनीन्द्रा अपि परिहृतमानसचापला अनाधेयातिशयसमाधानपरिपाकपरक्रमास्तद्वत्तयाऽर्हन्त्यनुमातुम् । न वाऽनुमास्यन्ति लिङ्गाभासैरापातप्रतीत्यापादकैर्न्यायविदः । ये च व्यवहारतुरङ्गममधिरूढा अपि गतिविन्यासवैशारद्यात्प्रमाद्येयुर्यथोदितपुंप्रयत्नप्रत्ययलक्षणात्पतेयुरेव पदे पदे त एते विषमे पथि विपद्यात्मन्यासमन्तात् । नैवैते प्रज्ञाजीविनः पशुरिव रोमन्थं विदधानः पराभवेयुः पुरुषार्थादित्यधिकरोति श्रुतिस्मृतीतिहासपुराणशिष्टाचारमानव्यक्तिरेतानत्र निरवशेषान् । दर्शितान्यपि पुरस्तान्मानवचांसि दर्शयिष्यन्ते परस्तादपि निमित्तान्तरात्तथाहि । यद्यपि प्रवृत्तिलक्षणे मार्गे यथायथं निरूपकप्रमाणान्तर्हृदयवचनाविभेदोपन्यासनमकार्युद्देशान्तरयोगात्तथाऽपि नैतावता प्रतिपिपादयिषितवस्तुविशेषप्रतिपत्तिप्रसूत्युपपत्तये प्राधान्येन ततो विलक्षणप्रधानतयाऽभिमन्यमाननिवृत्तिलक्षणे तस्मिन्नप्रति-

पाद्यैव प्रारब्धं भूयो भूयः पुरुषार्थमुद्योतयद्वचोजातमुदाहराम- स्तथाहि ।" श्रुत्या चाम्नायते "तथा हैनं श्रीरामचन्द्रं मारुतिः पप्रच्छ । केयं जीवन्मुक्तिः केयं विदेहमुक्तिः किं वा तत्र प्र-

४४ पुरुषकार एव सकलश्रेयोनिदानमित्यत्र श्रुतिशिरोवचनोपन्यासः ।

माणं कथं वा तत्सिद्धिः । सिद्ध्या वा किं प्रयोजनमि" ति प्रश्नं प्रस्तुत्य "सहोवाच श्रीरामः । पुरुषस्य कर्तृत्वभोक्तृत्वसुखदुः- खादिलक्षणश्चित्तधर्मः क्लेशरूपत्वाद्बन्धो भवति तन्निरोधनं जी वन्मुक्तिः । उपाधिविनिर्मुक्तघटाकाशवत्प्रारब्धक्षयाद्विदेहमुक्तिः। जीवन्मुक्तिविदेहमुक्त्योरष्टोत्तरशतोपनिषदः प्रमाणम् । कर्तृत्वा- दिदुःखनिवृत्तिद्वारा नित्यानन्दावाप्तिः प्रयोजनं भवति । तच्च पुरुषप्रय- त्नसाध्यं भवति। यथा पुत्रकामेष्ट्यादिना कर्मणा पुत्रं वाणिज्यादि- ना वित्तं ज्योतिष्टोमेन स्वर्गं तथा पुरुषप्रयत्नसाध्यवेदान्तश्रवणादि- जनितसमाधिना जीवन्मुक्त्यादिलाभो भवती,,त्यन्तं वस्तुतत्वमुत्तर- सौरभ्यभरं मुक्तिकायामुपनिषदि । एतेन मुक्त्योरुभयात्मनोः प्र- योजनभूतनित्यानन्दावाप्तिप्रयोजकीभूतश्रवणाद्यत्यासन्नसाधनसा- ध्यसमाधेरप्यभ्यर्हिततमपुरुषप्रयत्नपरायत्तता ऽधिगम्यते । प- रिनिष्ठितवस्तुनोऽप्येवंविधत्वेऽपरिनिष्ठितार्थपटल्याः पुरुषोद्योगैक- समाश्रयीभूतस्वरूपनिष्पादनावत्त्वमभ्यर्हिततरं भवत्येव सहस्र- धा । यस्तूपतिष्ठेद्दैवावृत्तमतिः पुरुषोद्योगात्स चासावसम्पन्नात्म- मनोरथव्यूहनिराश्रयश्चाकिञ्चित्करः पर्यवस्येदित्यवोचाम प्रागे- व ।

औरसा हि राजपुत्रा राज्यश्रियमनाप्नुवाना आप्नुवाना

४५ पुनरप्यत्र शङ्कापरीहारः ।

एवासम्बद्धा आत्मकुटुम्बकेन विद्यावन्तो ज्ये- ष्ठलक्ष्मीं समाश्रयन्तो निरक्षरभट्टारकास्तु र-



माभण्डां समाराधयन्तः सुनीतिमन्तो जनाः परमख्यातेर्भवन्तो दुर्नीतिमन्तः पुनः ख्यात्यतिशयमाभजन्तः कृतकार्यास्तत्तस्य नियतं फलमनासादयन्तोऽकृतकार्यास्त्वारादेव फलभारं भूयो भूयोऽधिगच्छन्त आलक्ष्यन्त इतीदमाद्युदाहरणमपि सद्यः सम- यान्तरे वा पुरुषकारोद्दीपितमेव दैवाख्यं वस्त्वदृष्टापरपर्यायं व्य- ञ्जयतीत्यनेनाऽपि प्रज्ञाप्रेक्षावतां पुरुषार्थ एव सङ्ग्रहणीयः । अकारणककार्योत्पत्तेरन्याय्यत्वात् । वासनासामान्यसंसिद्धौ सु- धाधारास्थानीयपौरुषविशेषप्रतिपत्तौ सत्यां साधकतमायां तत्स्व- रूपपरिग्राहकप्रमाणवचांसि हि " उच्छास्त्रं शास्त्रितं चेति पौरुषं द्विविधं मतम् । तत्रोच्छास्त्रमनर्थाय परमार्थाय शास्त्रितमि,,त्ये- वमादीनि श्रौतानि शास्त्रविहिताविहिते पौरुषे प्रतिपादयन्ति फ-

४६ पुनरपि पुरुषार्थ एव प्रोत्साहयन्तीनां श्रुतीनामुपन्यासः ।

लमप्येतयोरितरेतराविरुद्धमादिशन्ति । वास- नामधिकृत्य तु " द्विविधो वासनाव्यूहः शु- भश्चैवाशुभश्च तौ । वासनौघेन शुद्धेन तत्र चेदनुनीयसे । तत्क्रमेणाशु तेनैव मामकं पदमाप्नुही ,, त्युत्तरा गीः परमपदावाप्तिं तावच्छुद्धवासनायाः फलमवबोधयति । अ- शुद्धवासनाविपत्ताव"प्यथ चेदशुभो भावस्त्वां योजयत्यतिस- ङ्कटे । प्राक्तनस्तदसौ यत्नाज्जेतव्यो भवता कप,, इत्यसावु- त्तरतरा वाग्यत्नातिशयेन बलवत्तरसाङ्कट्यादप्यपहानिं सम्प- त्स्यमानामावेदयति वा दयावती । पुनरप्यस्यैव विस्पष्टप्रती- त्युपपत्तये " शुभाशुभाभ्यां मार्गाभ्यां वहन्ती वासनासरित् । पौरुषेण प्रयत्नेन योजनीया शुभे पथि । अशुभेषु समावि- ष्टं शुभेष्वेवावतारयेत् । अशुभाच्चालितं याति शुभं तस्मा- दपीतरत् । पौरुषेण प्रयत्नेन लालयेच्चित्तबालकमि,, तीद-

मादिवचोजातमुत्तरतममतिकारुणिकमाश्रीयतां तावत्। अयमत्र निष्कर्षः। प्रारब्धपुरुषार्थयोर्बीजाङ्कुरादिस्थानीययोरविचारणावशादितरेतरविलक्षणस्वभावमावितंतयाऽभिप्रेयमाणयोःस्थितिंस्वारासिकीं पर्यालोचितवतां तावत्त्रैविद्यवृद्धानाञ्च महाजनप्रणालीशिखामणिभूतानां वचोवल्लरीलावण्याद्युपलालिततर्कानेकत्वमाहिम्ना भूयोदर्शनादत्युल्बणानुभूत्यनुविधायिना दैवं खलु बीजस्थानस्थाय्युत्तरकालीनपुरुषार्थसमारम्भसामान्यहेतुभूतमाद्रियते निराबाधम्। यथैव धरित्रीसंस्करणमेघोदयसंस्फुरणकौशलयोगिकृषीवलसामयिकसंयोजनादृते समृद्धसत्ताकमप्यङ्कुरपत्रकाण्डनालगर्भशूकपुष्पफलभावेन परिणेतुं न प्रभवेद्बीजं क्षेत्रे ननु कुत्रचिद्वा। फलपर्यन्तकालाभ्यन्तरे, यथा पुनरन्तराया अतिवृष्ट्यनावृष्टिपुरोगमेतिबाधापरपर्याया आत्मप्रवृत्त्युपमर्देनानुगृह्णीयुर्निगृह्णीयुश्चोपर्युपर्युद्भवद्विकल्पशतानि स्वरसगत्या तथैवेह शुद्धभावोपगूहितनिश्चितधीसम्प्रत्ययसहभाव्यत्यासन्नास्थास्वास्थ्यादिसृम्प्रयोगानुकूलदेहश्रममेधाव्यापाराभिज्ञानकलाप्रावण्यशौर्यप्रजारञ्जनकरणत्रयीकौशलयज्ञविज्ञानप्रमुखानियतगुणप्रभवानित्यनिरन्तरकृत्यावर्तनलक्षणा किल निजोद्दिष्टपरिणामप्रतीतिजनकपुरुषकारसम्पत्तिमन्तरा करणात्मकं नो दैवं कृषिविद्यावाणिज्यराज्यभोज्यस्वर्गापवर्गाख्यं वस्तूपस्थापयितुं न क्षमते। अभिव्यञ्जकाप्रवृत्तावभिव्यक्तेरसत्वाकारकत्वात्। सम्पन्नाशेषविशेषमपि बीजं तद्धि भर्जितदशायां वा क्लेदितशोषिताद्यवस्थायां प्रतिकूलपुरुषकारवञ्चनागोचरं सत्स्वभावमेवात्मीयं जहाति किलाविवादं अह-

४७ पुरुषार्थ एव प्रारब्धमारचयन्न्युभावेवामू ऐकात्म्यतया स्थूलसूक्ष्मभावापन्नतया वा कार्य्यसिद्धिसम्पादकाविति सिद्धान्तितोऽर्थः।



र्नि हि रसा भूयाँसः सत्तां स्वां सद्य एव सम्पर्कवैपरीत्यरूपितमाधुर्यादयो यथायोगम्। इदमिदं ह्यनुभूत्यास्पदमनवद्यतयाऽभिमन्यमानमपि दैवमवद्यदशाविशेषमासेवत इति। एवं च विकलपुरुषकारसंभाराकारकलनावशंवददैवस्याकार्यकरत्वे कार्यकरत्वे च ततो विपर्ययप्रत्ययसन्तानसम्पत्सम्पन्नस्य यथाभूतमेव श्रद्धातव्यं नायथाभूतमिति निकृष्टाकूतास्ते न प्रमाद्यन्ति ह्यान्तर्हृदयाः सकलादपि भावभ्रमात्। इदमेवाभिसन्धाय "केचिद्दैवात्स्वभावाच्च कालात्पुरुषकारतः। संयोगे केचिदिच्छन्ति फलं कुशलबुद्धय" इति वादिविकल्पान्नानाविधान्। प्रत्यपादयदत्रभवान्याज्ञवल्क्यः प्रातिस्विकरूपेणैतेषां हेतुभावाभ्युपगमे सध्रीचीभावेन वा निर्ग्राहकसामर्थ्याभावमालक्ष्य कार्यानिर्वर्तकत्वात्मकमस्वारस्यैकद्योतनाय केचित्पदं प्रायुङ्क्त। अभिव्यञ्जकपरिकरसामान्यहीनं तावत्केवलं दैवं नालं किल क्रियां कामपि निर्वोढुमित्यसौ प्रसिध्यत्येव न्यूनता तस्मिन्। स्वभावश्च पदार्थगता प्रतिनियतशक्तिः सेयं स्वसंयोजकसामग्रीमृग्या न शक्नुयादत्यासन्नकार्यव्यक्तिं प्रख्यापयितुमित्ययोग्यताऽस्ति तस्यामम्। कालश्च पदार्थानां विपरिणमयिता पदार्थविभेदः। स न खलु दिग्देशादिसाधारणकारणासहभावी प्रभवेदेव प्रयोजयितुं कार्यतन्त्रम्। नैकल एव पुरुषकारो युक्तियुक्तसम्भारसमाधानानधीनो न क्षमते परिणामानिदानतामधिमन्तुम्। सर्वेषामप्यमीषां संहतिसम्भवेऽपि संहर्तुरधिकयोग्यतावतः सान्निध्याभावादस्ति ह्यप्रयोजकता संयोगस्याऽपि। इत्थं पञ्चाप्यमी पक्षाः सावद्या एव पर्यवस्यन्तः स्वात्मगतनिरवद्यताचिन्तायां पुनः स एष परमार्षः "यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत्। एवं पुरुषकारेण विना दैवं न सिद्ध्यती"त्युत्तरस्मृत्या पुरुषकारप्रसूति-

प्रत्ययपरायत्तस्वरूपयोग्यतापत्तिलक्षणां तावत्सिद्धिं दैवस्य सोदाहरणं निरणैषीन्निर्दुष्टाम् । चक्रस्योदाहरणं हि द्वयोरपि पुरुषकारदैवयोरन्यूनानतिरिक्तगतिविशेषशालिनोरन्योन्याकुण्ठनेन फलं न कुण्ठति कुण्ठनेन तु कुण्ठत्येवोभयं युगपद्वृत्त्यैकाल्म्यप्रत्यासत्तिमबाधितानुभूतिसमारूढां निराह निर्व्याजम् । तथा चाव्याकृतदशाविशेषनाम्नी नाम दैवव्यक्तिर्व्याकृतदशाविशेषविग्रहपुरुषकाराभिधेयाधियं बिभ्राणा न बिभर्त्येव तां ततो विधर्मिविषयां वेलायां नूनं व्यावहारिक्याम् । पारमार्थिक्यां तु बीजव्यक्तिरिव स्वयमव्यक्तैवेति व्यक्तीकारक्रियाकालीनकल्पनाभागिनी न भवेद्धन्त निलीनस्वरूपप्रकारपर्यवसन्ना । अत एव " सर्वमेवेह हि सदा संसारे रघुनन्दन । सम्यक्प्रयत्नात्सर्वेण पौरुषेणैव नान्यथे"ति निगदे किल वल्मीकजन्मना वासिष्ठे । एतेन वर्णितविधया पौरुषमेव प्रारब्धप्राधान्यव्यवच्छेदकार्येवकारवल्लभ्यमाद्रियामहे शश्वच्छ्रद्दध्महे च । दैवं तावत्पङ्गुस्थानीयमालस्यादिसमायोगाच्छरणीकुर्वाणैरुपरतिमिषेण पौरुषं पुनरकुर्वद्भिश्च भूयत एवान्तं यात्वा यावदर्थनिःश्रीकैर्मानवापसदैरिति नाप्रत्यक्षं परीक्षकाणामिति च स्थितम् । एवमद्य दुर्दैवपराभावितहृदयानामवद्यशिक्षाविभेदापविद्धविकृतपरिणामा हन्त निखशेषभारतधरित्रीप्रकृतिपूगानांस्वेभ्यः पुनः प्रशास्तृभ्यो व्यसनविषवल्लीफलप्रसवात्मान एवालक्ष्यन्ते । शिक्षा सेयमशिक्षणीयनयातिशयशाल्याङ्गलविद्यायाः प्रकृताप्रकृतैतिह्यपटलीसंस्तवविन्यासशालितायां एवास्ति वस्तुवृत्त्या । नै-

४८ प्रारब्धे बत श्रद्धामिषेणास्पृष्टपुरुषकाराणां पुनरालस्यादिपराहतकरणत्रयाणां दीनतादशामपेक्ष्य तद्विपर्ययेण समुपाश्रितपुरुषार्थानां सर्वतः कृतकृत्यता पुरुषभाणामिति फलितोऽर्थः ।

४९ भारतवासिनामाङ्ग्लभाषादिशिक्षणमहितावहमेवेति निरूपणम् ।



तस्याः सर्ववर्गीया एवार्जयितारः शिष्याः सन्तः प्रसादं तावच्छास्त्र्याः स्वस्याः स्थानिनं लेभिरे । अपि त्वस्थानिनमेव तमेतमकार्यकरणक्षमञ्चाप्रयोजकयोजनावन्तमाभेजिरे । अधिकार्यनधिकारिभेदभिन्नसमयसम्पत्तेरेव सुप्रसादसाधिन्यास्ततो दवीयस्त्वात् । नो खलु मानवाः सार्वदिका आ निहीननिषादेभ्य आ च सामन्तसम्भावितसत्तमेभ्योऽनन्यभावमधिरोहन्तो वा हन्ताधिरोहयन्तो मनागप्यभूवन्राजविद्याऽभ्यसनशीलितयैतावदालक्षिताः । त एव किलाधिकृतास्तत्र ये चाधिकृतनरवरपरम्पराकाः प्रायशः । तेन च स्वे वा स्वस्वामिनो भूयो भूयश्श्रेयः पदमन्वभूवन् । अधिकृतपरम्पराकपुरुषविशेषैकसङ्कलसतया शिक्षावस्तुनः कृतकृत्यत्वात् । अन्यथा तं तमर्थं प्रति प्रातिस्विकरूपेण सन्नियताः सर्व एवाधिकारिणो भवेयुरेव सङ्कीर्णाः । न ह्यसङ्कीर्णव्यवस्थामात्रदेहान्यतमावयवो ह्यधिकारी स्वासाधारण्येन च रूपेण प्रतीतिमभ्यागच्छेत् । अनभ्युपगच्छन्नेवायमसन्नेव सन्नात्मानमृते विषयो वा न प्रसिध्येत् । प्रयोजनसम्बन्धौ तु प्रकृते तत्सत्तानधीनसत्तावत्तया निरात्मकौ सम्पद्येयाताम् । इत्थञ्चानिष्टम् । तदेतन्माप्रापदित्यनुबन्धचतुष्टयमपरिहार्यमेवोपनमते । तथा च शिक्षा हन्तैषा शिक्ष्यमाणगुणगणव्यापृतात्माधच्छेदेनैव स्वात्मलाभं प्रख्यापयन्ती विकृतात्मतामतद्धर्मावच्छिन्नेष्वाधत्ते । तथा हि, सकला एव कारवः स्वक्रियां भुञ्जन्तः शिक्षायामुदितायामाप्रवृत्तमतिप्रत्यया यथाकथञ्चिदर्जितभृत्यया वा करालप्रकारागारा अध्यक्षमीक्ष्यन्ते । आदौ पुनर्मध्येधाऽभ्यासदशायाश्शिक्षामिमां क्लेशात्मिकां निश्चिन्वाना नोभयोरपि पथोः प्रयोजकभावं प्रतिपद्यन्त इतीतो भ्रष्टस्ततो वा भ्रष्ट-

इति न्यायस्योदाहरणभूमयो भवन्त्येवाविवादम् । मृतकश्रेणय-श्चात्मनां कृत्येभ्यो विमुच्यमाना आपत्तरदशामुपर्य्युपर्युपाददा-ना हता एवासमन्तात् । छायां पुनर्वेषभाषास्वभावादिशैल्या आङ्ग्लानां स्वीकुर्वाणा स्तयैव स्वीयां वा परकीयां परिणामप्रस-क्तिमनीक्षमाणा मार्गमाणाश्चोपायाभासानुभयोरप्यभद्रप्रदान्हि तं प्रति लोकानामपुरुषकारहतानां लालप्यमाना हन्तान्तं गत्वा विषमविषभाषाभिस्तातप्यमानाः सम्प्रतीयन्ते । एतावता शि-क्षाया एतस्या दातारश्च प्रतिग्रहीतार आङ्ग्लाश्चार्यवर्षीया उ-पर्य्युपरि पश्चात्तापभाजो भवितारश्चाविवादम् । उभयोरप्यनि-ष्टस्यैवान्ते प्रसूतिविषयत्वात् । तथा च शिक्षणमेतत्साम्प्रतिक-माङ्ग्लानां प्रभून्पुनः प्रजाद्रूषितहृदयतामेवापादयामास । व्या-पादयामास चाभितः स्थिरतरार्थानुभयतः श्रेयोवहान्नाम त्रिव-र्गापरपर्य्यायान् ।

नन्वाङ्ग्लप्रभुभिः पुराभवैः सहकारिमतिप्रदातृभिस्तावु-पाध्यायस्थानीयमनुजातिभेदैश्चात्ममतप्रसारणा-

५० तदंशे सञ्जाताशङ्कायाः परीहारः ।

यार्यवर्षीयेष्वभितो विनिविष्टा पुनरभीष्टमाप्र-साधितवती शिक्षा हन्तैषा चकास्त्येवाभ्युदयिकी । बाढम् । वि-ना तु शिक्षणेनैतेन शिक्षयैव पुनरार्यवर्षीयगीर्वाणभारत्यास्त-दनु स्वस्वप्रान्तीयप्राकृतभाषाया अथापि कथञ्चिद्राजकार्यकृता-भिनिवेशानां यावदर्थोपपन्नाङ्ग्लवाणीपरिचयमात्रेण वाऽनपका-रिमनःपरिणामजननेन नरनरेन्द्रयोरितोऽप्यतिशयिताभ्युदयानु-भूतिस्सदनुमानपदवीसमारोहा खल्वभ्रान्ता यदर्थोऽसावायासः समाद्रियते प्रयोक्तृभिः सूक्ष्मेक्षिकया । अप्रयोजकप्रकृतिके तु प्र-कृतिमण्डले मन्यमानोऽपि लाभो भवेदेवालाभात्मा प्रभूणाम् ।



सप्रयोजके तु तस्मिन्प्रभुता वा तन्निरूपिता यशस्विनी स्यात् । परिदेवना तु सम्प्रत्युदासीनानामियमेव हि या एता उदीरित-शिक्षा भारतप्रकृतयः प्रायशः स्वाभ्युदयकारिभ्यः समभ्यस-नीयाभ्यसन--समुपादेयोपादान--सङ्ग्राह्यैकग्रहण--सम्भाव्यैकभा-वन-सुविमृश्यैकविमर्शन-समाश्वास्यैकसमाश्वसन--सुभक्ष्यैकभक्षण-सुपानैकपान-सुगम्यामात्रगमन--सुपूज्यैकपूजन--सन्तोषणीयतोष-ण-स्वाराध्यैकसमाराधन--सन्ध्येयैकध्यान--स्वानुष्ठेयानुष्ठानादीति-कर्त्तव्येभ्यः प्रच्युतिमुपयातास्ततो विपरीतमतिप्रचाराद्बहुतरस-माजादिदुरूहव्यूहात्मनो निःशङ्कं कुर्वाणा भारतसन्तानयशःश-शाङ्कराहवः समुदिता इति । सामाजिकाः खल्वमी आज्ञाकारेणा-पि धर्ममात्मनां सनातनं विद्विषन्तोऽन्तरङ्गरीत्या प्रभुषु वैमनस्य-फलिनीश्चेष्टा इतस्ततः प्रतिपादयन्तीति जनश्रुतिपदवीं हन्ताऽऽ-रोहन्ति हि मतिमन्तो वा । यथा हीमे धर्मन्तावद्विद्वत्सिद्धादि-प्रणालीसमायातमपि न रोचयन्ते तथैवेह शास्तुरपि राज्ञो वशीभूय नेच्छन्ति तावद्वर्त्तनमात्मनो नितराम् । अपि तूपायैरनपायप्रा-यैस्सनातनधर्माचरणव्यतिक्रमणव्याजेनाभिप्रायान्तरमुद्भावयन्त-स्तत्स्वारस्यबलेन राजन्यप्यभक्तिमत्तया विभाव्यमाना आपद्यन्ते । यत्कार्यसम्पादनाय निमित्तीकृतं बहिरङ्गतो यन्मुख्यमेव तदेतदुप-नमते न तु गौणम् । तस्यैवाभ्यर्हितत्वात् । अङ्गमापराधे क-रणभूतेन विहितेऽप्यङ्गिन एवापराधविमर्द[illegible]त्वात्करणिनः । एवञ्च केचिदेव जना दारुणसमाचारा मृदुलप्रचारशीलिनो-ऽप्यात्मीयान्कलुषीकर्त्तुं प्रभवेयुर्यथोद्देशम् ।

वस्तुतस्तु नेमे लेशं विद्याया आन्वीक्षिक्यास्तत्प्रयोक्तृ-नरशार्दूलचेतश्चमत्कृतेस्तदनुमोदनदातृमतिमत्पुङ्गवानां वा त-

५१ तच्छिक्षणकृतदोषविशेषप्रदर्शनम्।

त्फलितार्थानां विजानते नितराम्। जानाना
या दुराग्रहगृहीतहृदया अस्वरूपाभिज्ञानप्रा-
या इवाचरन्ति तत्र तत्र। ननु जात्वर्थानामर्थविदां वा सौमन-
स्यं वाञ्छन्ति विपुलवैरवैश्वानरज्वालाजटाला इवेति नाविदितं
विदितव्यवहाररहस्यानाम्। सर्वसाधारणास्तूदीरितग्रामाङ्गलक-
लाकलापरसं सुधामिवात्पिबन्त इवापहृताशेषदेहावयवरसविशेषाः
समन्ततोऽनुभूयन्ते। विविधविषयविनिवेदकबह्वाङ्गलभाषानिबन्ध-
व्यासङ्गनिरता हन्तैते भारतकुमाराः पुनर्युवानोऽमितश्रमसमा-
क्षिप्तात्मानः स्ववयोनियामकलावण्यशौर्य्यवीर्यवत्त्वाद्यसाधारणगु-
णविहीना वार्द्धक्यसञ्चरन्नयनवैकल्यातिसारक्षयपुरोगमामयबाहु-
ल्येन नीयमानाश्च निरुत्साहा यावत्पुरुषार्थपराहतात्मानो निरीक्ष्य-
न्ते प्रायशः। कचिदेवंभूताः क्रियायां व्यवहारिक्यां काञ्चित्कालं प्र-
वृत्ता अप्यप्रवृत्तप्राया एव फलतः पर्य्यवस्यन्ति धार्मिक्याञ्च।
अभ्यसनशैली नूनमियमादित एव नास्तिक्यमापादयन्ती च म-
त्यामामुष्मिकोपायपरतायास्तावद्दूरीकरोत्येवैवंविधाननिशमात्म-
सात्कुर्वाणा प्रतिमत्ययम्। सर्व एवैते एकानुभवप्रत्ययसमारूढाः
प्रत्ययान्तरमप्रतिपद्यमानाः पुरुषार्थचतुष्टयात्प्रच्युता भवन्ति नि-
र्दिष्टाः। प्रत्यर्थमनीदृशाः शश्वन्मालिनमनसो विचेष्टन्त इति न
ह्यस्ति पारोक्ष्यं परीक्षकहृदयानाम्।

इत्थञ्च गृहीयराजकीयसामाजिकीयधर्मीयसम्प्रयोगानर्हमतिमत्ता-

५२ भारतवर्षीयाणां संस्कृतप्राकृतादिशिक्षैव श्रेयस्करी तथैवाङ्गलानामाङ्गलभाषा-

मुदूरगानां नामार्य्यवर्षीयाणां समूलोन्मूलमेवाङ्ग-
लभाषाशिक्षाप्सरण्यां पुनर्विस्मरणोपायसंयोजनम-
र्हतितरां कर्त्तव्यवर्गाग्रसरमिदानीं प्रभूणां नो
यथान्यायम्। एतेन प्रजाभ्यः स्वस्ति प्रभुभ्यश्च



यैवनानां पुनररबीपारस्यादेरिति वर्णनम्।

स्वस्ति सम्पत्स्यते यथाशास्त्रम्। अत एव ब्रह्म-
क्षत्रादयो निजनिजवर्णानुगुण्येन गीर्वाणभाषाञ्च
देशभाषामभ्यसेयुर्यथेच्छम्। कला अध्येतयोरेव जानीयुर्यथोत्सा-
हम्। अनुशासनानि वा प्रभूणामाङ्गलानामेवंविधाशिक्षाविधान-
विषयाण्येव सञ्चरेयुः। स्वस्वप्रान्ते प्रान्तान्तरभाषां वा मान-
वान्राज्यव्यवहारेषु माप्रवेशयेयुर्येन हि प्रान्तवासिनः प्रमुदितहृ-
दयाश्चान्यप्रचेतस्सञ्चारा निर्वर्त्तयेयू राज्यकर्माणि। सौमनस्यानि
नूनं नरनरेश्वरयोरुत्तरोत्तरमृच्छेयुरभिवृद्धिम्। सर्वानेव लेखन-
सम्भारान्प्रान्तव्यवहाराणां प्रान्तवासिन एवाधिकारिणो नि-
रूपयेयुः। तदध्यक्षा ह्याङ्गलाः स्वप्रयोजननिर्वहणाय प्रान्त-
भाषामभ्यसेयुः। न तु जात्वालस्यवशाद्राजसभावव्याजाद्वा
तदभ्यसनव्यापाराद्विरमेयुः। न जात्वात्मनामाङ्गलभाषाया अ-
भिवृद्धिं भारतवर्षीयेषु विधायोन्नत्यं राज्यलक्ष्म्याः सम्पद्येत
एतस्याः सम्भारा अन्यादृशा विन्यस्ताः। ते च शौर्य्यवीर्य-
कलाप्रावीण्यप्रकृतिचेतोहरत्वादयो धर्माः सङ्कलिताः। प्रकृ-
तिप्रकृतीश्वरयोर्भाषादिकृतवैषम्यादपि विनयप्रेमादेरनुवर्त्तनस्यो-
भयोरानुभविकत्वादितरेतरगौरवापादकधीप्रत्ययस्य वाऽनवरतम-
भिलष्यमाणस्य सर्वशः कृतकृत्यत्वाच्च। उत्तमाधिकारांस्तू-
त्तमश्रेणिभ्य एव नियच्छेयुर्मध्यमांस्तु मध्यमाभ्योऽधमानधमा
भ्य इतीयमप्यधिकारवितरणव्यवस्थाव्यक्तिः श्रेयस्करी यत
एतदादिसदर्थव्यवस्थानदशामेवाङ्गलपूर्वजप्रवीरा भारतवर्षे वर-
यामासू रोचयामासुश्चात्रत्या अप्युत्तमश्रेणयो यथावदेव ता-
न्धीरोत्तंसान्। अनार्या अपि भारतवसतयो यवना अरबी-
पारसी--उरदू--नाम्नीरेव भाषाः स्वीया अधिगच्छेयुः। ताभि-

रेव ते यथोदितगत्या कृत्येष्वात्मीयेषु च व्यावहारिकेषु सर्वतः समुत्सुका भवेयुर्येन ह्यतिक्रान्तात्ममर्यादाः पुनः प्रमादभूमयो न स्युः । किन्तवत्मीभिनिवेशिनः खल्वमी उपदेष्टृमहोदया निर्णीतपद्धत्या स्वीयास्वेव भाषास्वाकुलायास्वभिरता असङ्कलिततरमर्यादा वा सामाजिकसमाधाननिर्णेजका नोपतिष्ठेरन् । न चैकात्म्यं मतानां साङ्कर्यं वा शक्यते विधातुं विचारवद्भिर्विहितं वा तदवस्थं सम्पद्येत यतो भेदप्रपञ्चे मतभेदस्यैव व्य-

५३ उदितार्थोपसंहारः ।

तिभिद्यमानसंस्कारधारासमुपजन्यस्यात्यासक्तता । बलाद्विह साङ्कर्यं विदधाना वा चलितम्मन्यास्तद्व्यतिपर्यये निहताशया एवोपजायेरन्नमर्यान्तर इतीयं परिणामदृशा मुमुक्षुमन्यृभिः समालोचनीया निजावेशं वा परितः प्रयोजयद्भिः । न हि कस्य चित्पुरावेशसाधितं वस्तु कार्याय कस्मै चित् प्रभवेत्सुप्रीतपरिणामविग्रहाय जातु चिदिति क्षिपते नेतरेतरमतगोचरे बलाऽसूयावमनस्ये युक्तियुक्ते स्थैर्यानञ्च लभतो निर्मानैर्यत इति तदर्थे यतमानैर्वा यतमानम्मन्यैर्वैरम्यतामुदीरिताभ्यो विकृततरदुर्वासनाभ्य इति कृतं तावदेतावता ।

ननु कोऽन्वत्र भवाननुशासनविन्यासोपदर्शको निर्मुक्ताशेषव्यवहारवर्त्मापि सत्तसम्बद्धः पुनराङ्गलमहीपालशार्दूलैर्वा समं

५४ यथोक्तसमालोचनायामाक्षेपे तत्प्रतिक्षेपः ।

नितराम् । उच्यते । अहमस्म्येषां श्रेयोभिवाञ्छी च तत्फलैकदेशशान्तिप्रकरसमीहितात्मा शश्वत्पारमार्थिकव्यवहारविहङ्गमारूढो निजमूर्तिविभेद इति । ननु जात्वन्याङ्गशकल्पनापदं भवानि स्वतो वा परतो निर्विकल्पकप्रकाराकारो बाह्यमाभ्यन्तरञ्चेति तत्त्वम् ।

अथैके विजातीयधीमान्द्यबाहुल्याद्तीतानागतव्यापारप्रक्रिया-



मपरामृशन्तः सद्यः समनुभूयमानयैव कार्यसन्तत्या कृतकृत्यता-

५५ जन्मान्तरमनभ्युपगच्छतां वादिनामाशङ्का [illegible]पपत्तिव- [illegible]

मात्मनो विज्ञानन्तश्च जन्मान्तरमनुभूतिबाधतयाऽपलापयन्तोऽपि वृत्तीर्नानाविधा वासनापरपर्यायवतीरनुभवन्तश्च प्रत्यवतिष्ठन्ते । तदपरे न क्षमन्ते । तथाहि - अत्रैवं परिपृच्छ्यते किमेते जन्मान्तरं न्यक्कुर्वाणा न्यक्कारहेतुभूतसामग्रीं हन्त सतीमेवावेदयितुं प्रभवेयुराहोस्वित्तदाभासात्मिकामथवा भागत उभयात्मिकामिति । नाद्यः । जन्मान्तरास्तित्वप्रतिपादकसामग्री खलु सतीं सत्तरां पुनः सत्तामुपस्थापयतामुपपत्तिशतानां श्रुतिस्मृतीतिहासपुराणवचनानां शिष्टाचरणप्रतीतिप्राग्भारसमभिधायिनां बाधकसामग्रीसामान्यसङ्गृहीतानाञ्च जागरूकत्वात् । नान्त्यः । सत्तदाभासयोर्व्यक्तावेकस्यां परस्परपराहतत्वात् । सत्त्वं चात्र सामग्र्यां क्वचिदप्यविहन्यमानविन्यासविशेषसम्भरणशालित्वम् । असत्त्वन्तु तस्यां व्यभिचारिविन्यासोपस्कृतप्रतीतियोग्यत्वम् । नैतयोरेकाभावेऽपरव्यवस्थानस्य नियतत्वादुभयात्मकता संसिद्ध्येत्स्वरूपसती कुत्रचित् । न चैवं तर्हि सत्त्वमेव निरुक्तं तस्यां विनिगमनाविरहेणाऽभ्युपेयताम् । ननु जात्वसत्त्वं तदेतदित्यैकान्तिकम् सत्त्वमेव तस्यां गतं प्रोद्बोधयन्त्या नानाविधमानावस्थ्या जागरूकताया सांसिद्धिकत्वेनानैकान्तिकतैव तन्निष्ठाऽस्ति निष्परिहारा यतः । न वा मध्यमः । आभासीभूतायाः साधनसामग्र्यास्तादृग्रूपायेव साध्याकृतिं प्रति प्रयोजकभावस्यानुपपत्तिकत्वात् । नो खलु निराभासं वस्तु प्रतिपिपित्सता साभासा सामग्री क्वचिदिष्यते लोके साध्यलाभाय । न च केचित्तामेव निराभासां मन्यन्त इति मन्तव्यम् । अभिमतेर्वा केषाञ्चिद्व्याप्यत्वाभासरूपाया निग्रहस्थाना-

नतिशायिता यतः । उपपत्तयश्चात्र पूर्वेद्युः सामिकृतं सामिभुक्तं च वस्त्वपरेद्युः साकल्येन चिकीर्षन्ते च बुभुक्षन्ते वासनावन्तः । अद्य चारब्धं श्वो वा वासरान्तरे फलाय परिणमयितुं चेष्टते प्रेक्षाकारी ननु सर्व एव । प्रतिहतारम्भभेदा अपि ते खिन्नमनसः समयान्तरपर्यन्तं तत्सिद्ध्यै उपर्युपरि यतमानतराः संदृश्यन्ते रागिणो वा विद्वेषिणः । निदानं ननु रागद्वेषयोः प्राग्भवीया वास्तव्येवानृत्यन्तर्मनसि वासनासन्ततिरासमन्तात् । तामेवाधिकृत्य नामं नामं विदधात्येव भावं भावं प्राणभृत् । अनन्तश्च म्रियन्तो जनाः साहङ्कारा बिभ्रति तावद्धारणां देहान्तरसन्धारणलक्षणामिष्टान्यधिकतराण्यधिगन्तुमनिष्टान्यशेषाण्येव समूलमुन्मूलयितुं मिश्राणि पुनरमिश्राः । कारङ्कारमेवैवमापदि परं हारंहारमुल्लसन्ति तेजस्विनस्त्रिलोक्याम् । अचिन्त्यरचनागोचरचराचरोच्चावचसम्भाराकारविकारप्रकारपरिचिन्तया भवचातुर्यं बहुलम्बनमुन्मीलयन्ति नः समस्तानाम् । सकलमेव वर्तमानकालीनं वर्तनमात्मनिदानप्रसूतकालीनसकलसामग्रीसामान्यपराधीनम् । तस्यैव प्रत्यर्थमनुसन्धानक्रियाविशेषविषयत्वात् । यदेवं तदेवम् । यथा प्रासादादि । सर्जनानुकूला समस्तैव साधनसम्पत्तिस्तक्षादेः पूर्वभाविनी । न हीह पूर्वभावित्वेन भास्वरतत्सम्भारग्रामस्वव्यपाश्रयीभूतदेहविभेदादृते निष्पादनासमास्पदतामापद्यते । न्यायो ह्ययमेवान्तःकरणकुहरादुच्चरच्चावचविभेदद्वारा भविष्यन्तमेव देहमनुमापयत्यमोघम् । न हि भावा देहाद्युपाधिसमारोहिणो भविष्यद्देहोपादानलक्षणस्वरूपयोग्यताविपर्ययं प्रतिपद्येरन् । प्रतिपद्यमानास्तु देहमेवानागतकालीनं ज्ञापयन्ति चातितराम् । बिभ्राणा नानाशरीरकार्याणि फलार्थैवोत्तरकालभाविनि वाङ्मनःकायैः प्रे-



र्यमाणा देहग्रहणायैवाद्यन्तयोरवकल्पन्त इति मन्तव्यम् । वासनाव्यूहस्य हि प्राणभृतां भूरिभवजन्मक्रियाविभेदैरर्थतत्त्वं प्रति देहादिलक्षणमपरिहार्यहेतुभावभावित्वात् । न चानुभाविकं तिरस्कृत्याननुभाविकं वस्तु कल्पविकल्पकलामयं परिणामस्थैर्याय प्रयास भवेत्कथञ्चित् । वृत्तिवृत्तिमतामविचारितरूपाया अग्राह्यत्वेऽप्यपूर्वस्य तु तस्यास्तदवस्थावस्त्वात् । यदि करणत्रयक्रियासामान्यौदासीन्यलक्षणविलक्षणस्थितिमच्चेन्मनो निश्चीयेत निश्चितिरपि सा बाधकसामग्र्या वाऽन्यथाभावं न प्रतिपद्येत भर्जितबीजस्थानीयं तद्देहाद्यङ्कुरकार्योदयाय न प्रभवेदित्युचितैव कल्पना कदाचित्स्वरावताम् । करणञ्चैतत्प्रत्येकमात्मार्थाय व्याप्रियमाणं यावदेव न प्रशाम्यत्यपित्वशान्तिसम्प्रयुक्तविविधाविक्रियाशालैव चकास्ति मूर्तिमती तावच्चेयं निदानभूतदेहापत्तिस्ततोऽप्यासन्नतरा नृत्यत्येव प्रतिप्रत्ययम् । आस्तिका आस्तिकतरा नास्तिका वा नास्तिकतरा यादृच्छिकाः पुनर्मानवाः स्वस्वहृदयानुगुण्येन भावनासामान्यविशेषयोर्दशामितरेतरविरूपप्रत्ययाऽवभासिनीमध्यासीनास्तदनुरूपां नूनं देहव्यक्तिमुपाद[illegible]वामोघमिति स्थिते " जन्मान्तरशताभ्यस्ता मिथ्यासंसारवासना । सा चिराभ्यासयोगेन विना न क्षीयते क्वचित् ॥ १ ॥ वासना द्विविधा प्रोक्ता शुद्धा च मलिना तथा । मलिना जन्महेतुः स्याच्छुद्धा जन्मविनाशिनी ॥ २ ॥ अज्ञानसुघनाकारा घनाहङ्कारशालिनी । पुनर्जन्मकरी प्रोक्ता मलिना वासना बुधैः ॥ ३ ॥ पुनर्जन्माङ्कुरं त्यक्त्वा स्थितिः सम्भ्रष्टबीजवत् । शुद्धा सा वासना ज्ञेया जन्मबन्धविनाशिनी ॥ ४ ॥ भरतस्य त्रीणि जन्मानि " इत्याद्याः

५६ वासनावन्तो जन्मान्तरमाप्नुवन्तीति तर्कमहिम्ना स्थितेऽर्थे श्रुतिस्मृतीः प्रमाणयति ।

श्रुतयोऽत्रोदाहार्य्या नानाविधाः ॥ स्मृतयश्च " बहूनि मे व्य-
तीतानि जन्मानि तव चार्जुन । तान्यहं वेद सर्वाणि न त्वं वेत्थ
परन्तप ॥ १ ॥ जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
अनेकजन्मसंसिद्धिस्ततो याति परां गतिम्॥२॥बहूनां जन्मनामन्ते
ज्ञानवान्मां प्रपद्यते" इत्याद्या अनुसन्धातव्याः । ऋजुरासामप्य-
क्षरार्थः । गिर एता अपुरुषतन्त्राः पुरुषतन्त्रा वा त्रिकालविद्व-
दनाम्बुजातनिर्याता वस्तुयाथात्म्यमकरन्दमाधुरीवितरणमुखेन
विचारकचञ्चरीकसत्तमान्मदयन्ति हि प्रतिवचनाभिधेयस्वादुवा-
दम् । यदि जन्मान्तरं जन्तूनां नाभविष्यत्तर्हि वर्त्तमानमपि ज-
न्मानुभूयमानं नस्तत्सामान्यादन्तार्धिमेवागामिष्यत् । अनुभवगो-
चरमेवैतदतीतमनागतञ्च गमयत्यादरभरात् । ननु कारागारवस-
तिर्नः साम्प्रतिकी भूतामपि तां भव्यां चावधारयत्येवेति कश्चि-
त्प्रत्येति वा प्रत्याययत्यार्त्तमानवान् । नैष दोषः । सद्यस्समनु-
भूयमानबन्धनागारसन्तापहेतुभूतस्य हि मन्तोर्निदानपदाभिधेय-
वासनायाः खलु प्राचीनायाः स्वापकर्षप्रकर्षप्रयुक्तलघुभावदीर्घीभा-
वगाविताभ्यां नाम व्यवधानाभ्यामनेकजन्मसंयोजनानुकूलगुणव-
त्तायाः स्वारसिकत्वे प्रत्येतुर्वा प्रत्याययितुस्तस्याभियुक्ततया मा-
तापितृसहस्रतोऽपि वत्सलतरत्वात् । अत एव पैप्पलादाः " प-
ञ्चात्मकं पञ्चसु वर्त्तमानं षडाश्रयं षड्गुणयो-
गयुक्तम् । तत्सप्तधा तु त्रिमलं द्वियोनि चतुर्वि-
धाहारमयं शरीरमि"त्यादिनोपक्रम्य " ऋतु-
काले प्रयोगादेकरात्रोषितं कललं भवती"त्यादिना
देहस्थितिं परामृश्य " नवमे मासि सर्वलक्षणज्ञानसम्पूर्णो भवति ।
पूर्वजातीः स्मरति । शुभाशुभञ्च कर्म विन्दति । आहारा वि-

५७पुनरपि सङ्कापू-
नैकं गर्भोपनिषद्व-
चोभिर्यावदज्ञानं ज-
ननमरणप्रतिपाद-
नम् ।



विधा भुक्ताः पीता नानाविधाः स्तनाः । जातश्चाहं मृतश्चैव ज-
न्मजन्म पुनः पुनः ॥ यन्मया परिजनस्यार्थे कृतं कर्म शुभाशु-
भम् । एकाकी तेन दह्येऽहं गतास्ते फलभोगिनः । यदि योन्याः
प्रमुच्येऽहं तत्प्रपद्ये महेश्वरमि"त्यादिना घोराकारगर्भवासलक्षणाने-
कजन्मसमायोगं तेषु दोषदर्शनं ततो निष्कामकर्माचरणपरायत्त-
सत्वशुद्धिस्ततो वैराग्येण महेश्वरशरणीकरणमित्येवमादीन्विषय-
विशेषान्समामनन्ति गर्भोपनिषदि । न चोत्तरकालजन्मनोऽतीत-
स्मरणविषयमनाश्वासार्हमापद्यते जन्मानागतन्त्वर्कफलपरिपाकवी-
क्षणमिवोपनमते द्रागित्येव यत्नं विनेति युक्तम् । अनुभूतस्या-
प्यतीतजन्मनो विस्मरणकारणानां तावद् व्यवधायकभावानामपूर्व-
भूतदेशकाल[illegible]न्द्रियादीनामावरकत्वेऽनागतस्वरूपानुसन्धानामा-
वसाक्षाद्धेतुभूतवर्त्तमानदेहेन्द्रियोपाधिपरिच्छिन्नधीमान्द्यस्य सद्यः
समनुभूयमानवस्तुसामान्यानुसन्धानस्याप्यपवारकस्य पुनस्तयो-
रनाश्वासे हेतुभावस्य सद्भावात् । न हि जन्मनो भविष्यतः स-
म्प्रति सामग्र्यां सत्यामर्कफलपरिणामसम्भावनं युक्तियुक्तम् ।
सति बीजे सकलेतरसहकारिकारणत्वेऽङ्कुरोदयस्याप्रत्यूहात् ।
भरतेन हि महाराजेन वैराग्यबोधोपरतिसम्पत्संपन्नेनापि जन्म-
त्रयमनुभूतं व्यासवचाँस्यवगमयन्त्याञ्जस्येन । भगवाँस्त्वात्मन-
स्त्वार्जुनस्य जन्मबहुत्वमाचख्यौ प्रश्नपुरस्सरम् । वासनाऽवसा-
नशालिनो हि जन्मनो ज्ञानमाहात्म्यातिशयस्फूर्त्यात्मनो व्यती-
तानेककजन्मकदम्बावाप्तिपूर्विकैवावगतिरभ्यनुज्ञायते । वासनावतां
पुनः प्रेत्यभावमुपेतवतामस्तिता हि जन्मनो ध्रुवमावेदिता भवति ।
तथा च मन्त्रार्थवादेतिहासपुराणशिष्टव्यवहरणोपपत्तिभ्यो जन्मा-
न्तराभ्युपगमो निरवद्यो निराबाधश्च । एवञ्चानपन्हवार्हमपि

जन्मान्तरमपन्होतुकामाः कृत्रिमबुद्धयो निसर्गतो धर्माधर्मयोः पुण्यापुण्ययोः स्वर्गापवर्गयोरश्रद्दधाना दयाऽऽर्जवशौचाचाराद्यलौकिकगुणाळीं विलक्षणसूक्ष्मेक्षिकया व्यग्रीकुर्वाणाः प्रमादालस्यादीन्दोषविशेषानर्थादेवोत्तेजयन्तोऽप्यभ्युक्तपद्धत्या जन्मान्तरास्तित्वं प्रतिपद्यमाना जनाः सदर्थसङ्गृहीतमानससरणयो निर्वर्णिताशेषदूषणपटलात्परिमुच्येरन्यथार्थयेयुश्च पदवीं प्रमाणानामनुभूतिभुवम् । एतावता निरूपणेन जन्मान्तरमनभ्युपगच्छन्तस्समस्ता एव सदसद्वादिनो निरस्ता वेदितव्याः ।

५८ जन्मान्तरमपन्हुवानानां महम्मदादीनां वचोभिरपि कुरान्वचनानुग्राहकैर्वा वासनावतां जन्मान्तरसंसिद्धिः ।

ये च महम्मदमतानुयायिनस्तदेतदनभ्युपयन्तो रूपान्तरेणोपपत्तीर्दर्शयन्तश्च संदृश्यते ते च "अव्वलो माखलकल्लाहो नूरी॥१॥कुन्तो नबीयन् व आदमो बैनल् मा एवतीन्॥२॥लौलाक लमाखलक्तुल् अफलाक ॥आयत्॥ इत्येवंरूपैः "कुरान्" वचनविभेदैर्ग्राहयितव्या एवास्तित्वं जन्मान्तरस्य। मत्तोन्यो भविता देशिक इत्याचक्षाणस्स्रष्टेरादावात्मनोऽस्तित्वं प्रब्रूते। यदा हि नाजनिष्ट "दमा" ह्ययस्तदानीमप्यहमासं नाम देशिकभावेनेति च। वचने नन्वेते स्वात्मनो जन्मान्तरानुभूतिप्रतीतिजनने स्वोपदेश्यजनसमूहसंस्कारतारतम्यप्रत्यनुसन्धानेन (ज्ञाते) तानपि मनुष्याञ्जन्मान्तराद् व्यावर्त्तयितुं कथङ्कारं स्वयमीशे। कथं पुनश्चराचरादिभेदभिन्नवैचित्र्यं पुनर्जीवाधारं नानाकारं प्रतिषेधेद्भवन्नेव दूरदर्शी । नो खलु प्रेत्यभावसमनन्तरमात्मन्यायप्राक्कालञ्चैकत्र सङ्घीभूय वर्त्तमानानानान्तावज्जीवानां देहं विनाऽवस्थानमुपपद्यते। न हि "पुनर्जीवप्राणधारण" इति स्मरणा "ज्जीवति प्राणान्धारयती" ति निर्वचनाच्च देहान्तराधारहीनाः प्राणाः क्वचिद्गच्छेयुर्वा तिष्ठेयुः।



वर्त्तमानव्यवहाराश्रयः खलु देहोऽयमंशुभिः पार्थिवैरैकात्म्यमापन्नो नातः परं व्यवहारास्पदतां भजत इत्यावयोरविवादः। विवादाध्यासितन्तु देहान्तरमेवेति तत्किलान्तिमदिनसम्पत्स्यमानसदसद्व्यवहारसमीक्षानिर्वर्तनाधीनसदसत्फलानुभवयोग्यव्यवस्थाविशेषान्यथाऽनुपपत्त्याऽभ्युपेतव्यमेव देहान्तरमकामैरपि वा तैरेतैः । अन्यथा वाचस्ताः "मालिके यौमिद्दीन्" इत्येवंरूपा निर्विचाराः प्रसज्येरन्। न चात्र शरीरान्तरमनन्तराकृत्य रूपान्तरेणैव केनचित्कल्पनाशरीरेण न्यायव्यवस्थां सा सम्पत्स्यत एवेति साम्प्रतम्। भूरिसम्भारकल्पनामपेक्ष्य तद्रूपानिरूपिकाञ्चाम गुरुभूतां लघुभूतेन कल्पसामग्रीमात्रसम्पाद्येन देहान्तरेणैव तद्व्यवस्थायाः साकल्येनोपपत्तौ न स्याद्वानिरीषद्वा वस्तुवृत्ताय सूक्ष्माक्षाणाम्।

५९ वासनाविलये जननादिविलयस्तदस्तित्वे जननाद्यस्तित्वमिति सिद्धान्तितोऽर्थः।

इत्थञ्च वासनासामान्यापहानिपूर्वकमात्मज्ञानसमवाप्तिरेव "स जन्ममरणेभ्यो विमुक्तो भवति । गर्भवासात्पूतो भवति । न स पुनरावर्त्तते न स पुनरावर्त्तत" इति पैप्पलादानामाम्नायमनुग्राहयन्ती जन्ममरणादिप्रवाहविपदं वियोजयत्यप्रत्यूहम्। नास्या ज्ञानावाप्तेः परतरोऽस्त्यभ्युपाय एको वा यद्बलात्ततो विमुक्तिमापद्येरन्नधिकारिसत्तमाः। न ज्ञानासादितसिद्धोपाया मनोरथैरनवरतमुपजायमानैर्वा केवलैरुपेयमसाधारणं परिचेतुं जगत्यां क्षमन्ते । नापि रिक्ताकूताः साद्गुभावमधिजग्मुर्वाधिगच्छेयुः। क्लेशस्यैव प्रयोज्यप्रयोजकभावसम्बन्धबन्धनस्योच्छेदापत्तेः। तथा चास्त्येव वासनावतां जन्मान्तरमिति सिद्धम्।

नन्वेवमात्मनो जन्मान्तरस्य प्रसाधने को लाभोऽनर्थी-

कारे वा तस्य का हानिः । अलाभ एव लाभो विचारणीय-वस्तुविप्लवशरीरी हानिस्त्वामार्मिकसंख्यता-समुपाधानास्पदीभूतवर्त्तमानकालीनाविशिष्टार-म्भप्रयोगपराङ्मुखता हन्त प्रमादालस्यादिस-म्भारसम्भृतात्मा सर्वेश आपद्यते तथाहि ।

६० जन्मान्तराङ्गीकारानङ्गीकाराभ्यां लाभहान्योः प्रदर्शनपुरःसरं प्रकृतार्थोपसंहारः ।

जन्मान्तरमश्रद्दधाना बत मानवाः करुणां भूतेषु प्रायेण न प्रयोजयेयुः पाप्मभ्यो न विबिभीयुः सुकृतक्रिया नाचरेयुरदृष्टं तज्जन्यं न सम्पादयेयुर्व्यवहारसर्वस्वसन्मार्गसेतुं प्रविभिद्युर्वारं-वारम् । मृषाव्यवहारा विकसेयुर्यथास्वं निर्भीकाः । सामाजिकसमाधानसम्पत्तिरक्तात्मा यायाल्लयं यथायोगम् । तारतम्यानुवर्त्तनं पुनर्व्यवहारकालीनं नापद्येत प्रवृत्तिं तां वैनेयीम् । अभ्यासा वा कुण्ठितप्रायाः फलार्थिनामपि पर्य्यवस्येयुः । वृत्तयस्तामस्यः सहसैव प्रादुर्भवेयुः । राजस्यस्ता अनीदृग्रूपा भवेयुस्तरुणायिताः । सात्त्विकी सा वैराग्यमेव सततं समाश्रयेत् । वासना च वैषयिकी क्वचिदपि नोपरमेत् । स्वर्गापवर्गौ न प्रसिद्ध्येयातामितीयं दशा प्रमादादिप्रभवा विशेषतो जागर्त्येव । न चेयमपार्थपरम्परा नोन्मीलति किं नु जन्मान्तरास्तित्ववादिष्विति वाच्यम् । स्वाभाविकदोषोपहतानामेतेष्वेतदुन्मीलनाकारसम्भवेऽपि जन्मान्तरकृतानुसन्धानसम्पत्समृद्धमतिमाहात्म्यानां परम्परायास्तस्याः प्रायेण वैदेशिकत्वात्पुरुषधौरेयाणाम् । ये यद्दोषस्वरूपानुसन्धायिनस्ते युगपद्युगपद्वा तद्दोषेभ्यो मुक्तिमृच्छेयुरिति न्यायोऽयं न विहन्यते । एवञ्च स्वार्थेभ्यस्सर्वमानुषाभ्यर्हितेभ्यो न प्रमाद्येयुः प्रेक्षावन्तो न वा तदपूर्वात्प्रच्युतिमाभजेयुरिति सुविहितमेवेह जन्मान्तरं प्रतिपत्तव्यमिति सुमतयो विभावयन्तु तराम् ॥



समस्तसौभाग्यसमर्थनोद्यता
मतिप्रकर्षादिममादराद्भृशम् ॥
विमर्शमुद्ग्राहितसाध्यशालिनम्
विभावयन्त्वात्महिताय शीलिनः ॥ १ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यपदवाक्यप्रमाणपारावारपारीणत्वाद्यनेकपदाङ्कितजगद्गुरु श्रीमच्छङ्कराचार्य श्रीशारदापीठद्वारकासंस्थानाधीश्वर श्रीमत्केशवाश्रमस्वामिदेशिकवरकरकमलसञ्जातजगद्गुरु श्रीमच्छङ्कराचार्यश्रीशारदापीठद्वारकासंस्थानाधीश्वर श्रीमद्राजराजेश्वरशङ्कराश्रमस्वामिविरचितोऽयं विमर्शः समाप्तः ॥

श्रीमच्छङ्करभगवत्पूज्यपादाचार्याणामवतारशकाब्दाः २३६७
विक्रमशकाब्दाः १९८३ पौषशुक्लपौर्णिमायां सोमे शिष्यसञ्चारशालिनि राजते वसतिर्मुरादाबादनगरे ॥